।शिवस्य समागमप्रार्थनया हेतुभूतया संप्रति तवैवं निश्चयेन इति हूं प्रशोचनीयतां गतं प्राप्तं· द्वयं लेखैव चंद्रकला शोच्या आसीदित्यर्थः· कलावत अंश
द्वयस्य प्राप्तिद्वंद्वं कला अस्य लोकस्य नेत्रकौमुदी आह्लादकतया नेत्रयोश्चंद्रिकारूपा त्वं चेत्यर्थः अयमतमिति भूतनिर्देशेनावश्यभाव्यत्वं सूच्यते·
कपालिनः नेत्रकौमुदी त्वेतामं च शोचनीयत्वस्य युक्ततान्वयत इति ४६ उत्कंपिनीति· रत्नावल्यां वासवदत्तां दग्धां संभाव्यतामनुध्यायतो वत्सराज
स्योक्तिरियं· हे प्रिये क्रूरेण दहनेन दारुणतया त्वं सहसैवा कस्मादध्यानवीक्षितासि· सेदर्पातिशयशालिनी मस्तवदर्शने सति क्रूरेणापि दहनेन दग्धु
मशक्यत्वादिति भावः अदर्शने हेतुमाह धूमेति· धूमेनाचिततो युक्तः· धूमान्वितेनेति पाठः स एवार्थ एव· किंभूता त्वं· उत्कंपिनी· उत्कर्षकंपवती· भयेन परि
स्खलितः अंशुकांतो वसनप्रांतो यस्याः सा तथाभूता· प्रतिदिशं विधुरे कातरे ते अनुभूते लोचने क्षिपंती। विधुरे विप्रलेइ इति दीपिकायां मयानवीक्षिता
सीति केषांचिद्व्याख्यानं तु धूमांचितेनेत्यस्य निरभिप्रायकत्वापत्त्या विरुद्धमतिकारित्वेन चोपेक्षणीय ४७ साध्विति पुष्करैः पद्मैः साधुकृतं यत अभिराम
तयोः सौंदर्येणाधिके चंद्रमसि सति मीलितं मुकुलितं· पुनरिति त्वर्थे· तेन चंद्रेण तु साहसं धार्ष्ट्यमनुष्ठितं कृतमित्यर्थः। किंभूतेन ऊपिनि उत्कर्षशालिनि
कामिनीमुखे सति उद्यता उदयं प्राप्नुवता· अत्रोत्तरवाक्यगतेन पक्षद्वयेन पूर्ववाक्ये तत्साधुकृतमिति तच्छब्दाक्षेपः ४८ येनामेति· भवभूतेरियमुक्तिः नदस्य
स्पदोहृयोश्चेत्येकत्वे बहुवचनं· तेन ममेत्येकवचना विरोधः नामेति क्रोधे कुत्सने वा· नाम प्रकाश्यसंभाव्यक्रोधोपगमकुत्सनेऽस्य परोक्तेः येनाम के चि

ज्ञानाद् इह लोके मम भवत्तां अवधीरणां ग्रथयन्ति कुर्वन्ति ते किमपि जानन्ति अपि तु न किमपीति काक्वा अर्थः । अत एतान् प्रति एष यत्नः । मालतीमाधवाख्य-
प्रकरणारंभः प्रयोजनं भवतीति शेषः । अत्र ग्रंथस्य परार्थत्वात् विशेषनिषेधस्य यशोधाम्युत्तमफलकत्वात् कं प्रतीति जिज्ञासायामुत्तरार्द्धं कालोऽयं निरव-
धिरनंतः इति हेतोः कोप्येकः मम समानधर्मा पउत्पत्स्यते पृथ्वी विपुला विस्तृतेति हेतोः श्लाघिता तं प्रति यत्न इति प्रत्नः छंदः पोर्वा शब्दस्य वाध्याहारेणायोजनी-
यं इयता कालेन अनुत्पन्नस्य कथमुत्पत्स्यमानत्वं वियमानत्वे वा कथमदृश्यत्वमित्याशंकाद्वयं क्रमेणाह गुह्यतयेन परिहृतं केचित्तु · नोऽस्मत्संबंधिनि · इह नाट-
केऽपि नाम केचिद्धि रक्का आत्मनिष्ठा अवज्ञां प्रथयन्ति ते किमप्यनिर्वाच्यं तत्त्वं ब्रह्मस्वरूपं जानन्तीत्यर्थमाहुः ॥ ४९ ॥ आसा विति · आसोद्दृश्यमानचिह्नो वसंतका-
लः लंकातो हनूमान् निर्गतः कीदृशः मरुता वायुना चुंबिता संस्पृष्टाः केसरा वकुलानागकेसरा वा यस्मिन् तथाभूतः हनुमत्पक्षे मरुता पवनाधिष्ठात-
देवतारूपेण पित्रा चुंबिताः केसराः स्कंधस्येत्यर्थः प्रसन्नताराधिपस्य चंद्रस्य मंडलं अग्रणीः अग्रेसरो यस्य प्रसन्नताराधिप एवं मंडलाग्रणीर्यस्येति
वा तथाभूतो वसंतः पक्षे ताराभिधायाः स्त्रियो धिपः सुग्रीवः तस्य मंडलं राष्ट्रं सैन्यं वा तत्राग्रणीर्मुख्यः · वियुक्ताभी रामाभिः रमणीभिरातुरया कान्तया दृ-
श्यावीक्षितो वसंतः ॥ विरहोद्दीपकत्वात् · पक्षे वियुक्तेन रामेण आतुरया उत्सुकया दृश्या वीक्षित इत्यर्थः ; ५० करवालेति योऽसौ प्रसिद्धः कर्णः स भूपति-
ना दुर्योधनेन यदि तत्र कार्ये सेनापत्ये विनियुज्येत ततस्तदाहतं तर्पणं च राज्यं सामादिकं हतं स्यात् सफलं स्यादित्यर्थः कीदृशः करवालेन खड्गेन करा-
लो भीषणो दोः बाहुरेव सहायो यस्य तथाभूतः · तथा पृथिसंग्रामे विजयार्जुनयोः पार्थकार्त्तवीर्ययोरेको मल्लः प्रतीकारसमर्थः · विजयनामा योऽर्जुनः
पार्थ इति वा · विजयार्जुनेक मल्ल इति पाठे विशिष्टस्य जयस्यार्जने संपादने एक मल्लः प्राधान्येन समर्थ इत्यर्थः · अत्रासावित्यत्र कापुनः स इति न छ

ध्वनिर्ईशानन्दच्छब्दार्थकत्वं तस्य नास्तीति निगम्यते ५१ पदमिति ५२ मैश्वर्यं प्रतिभक्तस्योक्तिः हे ईश इदं निखिलमर्थमंडलं प्रपंचजातं यः पुरुषः अविक-
ल्पं । विकल्पः संशयस्तद्रहितं यथा स्यात्तथा भवद्वपुर्भवत्स्वरूपं पश्यति · बाधायां सामानाधिकरण्यं परमार्थतोऽसत्त्वेन तद्बाधेन भवं तमेव पश्यती-
त्यर्थः यथा शुक्तेर्जलस्य प्रपंचस्य परब्रह्मस्वरूपताभावादसंगतेः अस्य आत्मैक्यदर्शिनः नित्यसुखिनः प्रकाशमाननित्यानंदस्यात्मपक्षे ता आत्मस्व-
रूपेण जगति प्रपंचे परिपूरिते वा मे आच्छादिते बाधितम् इति यावत् · कुतः । कस्माद्भयं न कुतोपीत्यर्थः । द्वितीयाद्वै भयं भवतीति श्रुतेः । विकल्पं · विविधकल्प-
नायो गिरिदमिति केचित् । अत्र पक्षे दृश्यवद्दृहितो यानन्नतादिदं शब्दस्तदर्थपरामर्शकः ५१ पन्नदिति · वेणीसंहारे भीमस्योक्तिः अस्य भूपतेर्युधिष्ठिरस्य
तस्य सिद्धं पत्तं ऊर्जितं तेजो द्वन्द्वं अस्य युगंशा त्रेतेजः प्रतापरूपं आसीदिति शेषः तदाद्यूतप्रसंगे अद्येऽयाशकैर्दीव्यता श्रीडतामुनेन यातानूनं तदपि तेजः हा-
रितं अर्थाच्छत्रुभिर्गृहीतमित्यर्थः शत्रुसंहारितमेव · तदेव नूनं तेजोपीत्यपिशब्दार्थः अत्र पक्षे शानंतरवर्ती तच्छब्दो विप्रसिद्धिपरामर्शकः । किं पुनरिद-
मादि रितियोस्य विस्मर्तो कदेशो वज्रलेपायितम् इति सिद्धं ५२ कल्याणानामिति · मालतीमाधवे सूत्रधारस्य सूर्यप्रार्थनमिदं · हे विश्वमूर्ते सर्वात्मक सूर्य-
सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः त्वं कल्याणानां तद्भूतनामिति यावत · आपुष्यर्थमिति वत्कारतो कार्थोयवाशात् महसां तेजसां भाजनमाश्रयो-
सि · अथ न स्सारं भेमपि धुयोनित्यमार वहन क्षमां लक्ष्मीमशमतिशयेन धेहि अर्पय · हे देव प्रसीद · हे जगत्त्रा त्राथ नम्रस्य प्रणतस्य मे मम पापयतज्ज्ञात-
मज्ञातं च पापं तत् प्रतिजहि नाशय भो भगवन् भूपसे वदृत रायमंगलाप्रश्नेयसे भद्रं प्रकल्पं भद्रंशो भनंकर्म वितरदेहि · भद्रं यथा स्यादिति कि यावि शेष-
णं वा · त्वमिह महसामीशिषे त्वं विषत्से पुण्यां लक्ष्मीमथमपि द्दृशांधे हीतिपाठे तु इह लोके त्वं कल्याणानामीशिषे कल्याणानि नियमयसीत्यर्थः अधी

गर्थदयेशां कर्मणीति कर्माणि षष्ठी· पुण्यं पुण्यफलं· विषक्रेकरो विदद्दासीतियावत्· दृशं· कृपार्दृष्टिमित्यर्थो वो ध्यः· अत्र यस्य सद्दृश्ये नज्ञान
त्वाज्ञानत्वाभ्यां रूपाभ्यां परामृष्टस्य सकलस्य पापस्यैकेनैव ज्ञत्वस्य देन यापत्वेन रूपेण परामर्शोपपत्तेर्न द्वितीयतत्पदापेक्षा· यत्तच्छाम एकरूपेयो
व परामर्श इति नियमे मानाभावात्· प्रदीपकृतत्त्व· यद्यदिति न यद्द्वयं· किंतु नित्यवीप्सयोरिति सूत्रेण पदोद्दिष्ट्वात् यत्तो यमादेशः· तथा चादेशि
ना एकेन पञ्चदिनत्वस्य देन चैकरूपेणैव पापपरामर्शः आदेशस्तु स्वाकल्पेनान्वयेतत्सर्वमाह कर इत्यैकत्वैव तेन न तदुपपत्तौ न तच्छब्दापितदपेक्षे
।त्याकृतिस्पलविकृत्तेरेणा ५३ किं लोभेनेति· राम एव वनवासे हेतुचिंतयतो तस्मरणस्यो क्लिश्यम· स ऽ। चिनयार्जवादिमत्वेन च सिद्धो भरतः लोभेन
विलंघित आक्रांतः ।कि· येन भरतं न एतत् वनवासादिकं एवं कपटेन मात्राकारणभूतया मातृद्वारेतियावत्· कृतं संपादितमित्यर्थः· येन पुत्रलो
भरूपेण हेतुना मात्रा कर्तृभूतया एतदेवं वरप्रार्थनच्छलेन कृतमिति वा अनेनौचित्यकारित्वेन कोपाज्ञामग्रहणं· अथवा मे मध्यमामाताकेकेय्येव स्त्री
णां निसर्गसिद्धो लघुतां स्व इतां गता प्राप्ता किमिति वितर्कः एवकारेण भरतव्यवच्छेदः· पुनर्विमर्शनहमिच्छेतदिति· एतन्मम चिंताविषयीभूतं द्वैत
यमपि भरतस्य लुब्धत्वे· मातुः क्षुद्रत्वं च मिथ्या· कुत इत्यत आह आर्येति· इति शब्दो हेतौ· असौ गुरुर्भरतः विमर्शेन कोपायगमान्मान्यत्वेन नामा
ग्रहणं आर्यस्य श्रेष्ठस्य रामस्यानुज इति हेतोर्हतं· माता तातस्य दशरथस्य कलत्रं भार्येति हेतोर्हिता पंचेत्यर्थः· तर्हि केनैतत्कृतं तत्राह अनुचि
तमिति। विधात्रा अनुचितं कृतमिति मन्ये इति संबंधः ५४ श्रितेति· सामोपायलब्धसिद्धीनां राज्ञां वर्णनमिदं· अद्यते राजानो विग्रहस्य प्रद्वस्य
ह्ययतोनत्यागेन रात मस्तु खं दुःखं ये यांत यथाविधाः शेरते निश्चिततया निद्रां कुर्वतीत्यर्थः कीदृशाः ।श्रिताक्षमाक्षोतिर्येस्तथाभूताः रक्षाऽनुरक्ता

भूः लक्षणया तत्कृतनिखिलजनोपेक्षिता दृशाः। शिवेन कल्याणेनालिंगिता मूर्त्तिर्ययेयं तथा भूतेति। अत्र श्रिताक्षमा भूमिर्येन तथा भूता रक्त
स्य रुधिरस्य भुवस्थानानि। शिवाभिः क्रोष्टीभिरालिंगितमूर्त्तयो विग्रहस्य शरीरस्य क्षयरोगेन शेनगता असवः खानादिषाशि चयेषां तथाभूताः
योद्धार इति विरुद्धप्रतीतिः ५५ अलमिति। कस्यांचित्कामिन्यामनुरक्तस्य कामुकस्येयमुक्तिः। चपलतादिहेनर्वाङ्गना संगमनिरूढतया योनिनीयाः तथा
चातिचपलत्वादस्थिरत्वात् स्वप्नः स्वप्नसृष्टिः मैत्री दिनाऽसदर्थप्रकाशनं मायायास्तत्सदृशत्वात् परिणतिविरसत्वाद्विरहादिदुःखानुबंधित्वाच्चांग
नायाः संगमेन अलं प्रयोजनाभाव इति तत्त्वं परमार्थं ज्ञातवतो ऽनेकवारं यद्यपि यद्यपि आलोचयामस्तदपि तथापि अंतरात्मा हरिणाक्षीन विस्मरती
त्यन्वयः अत्र त्वादित्येकदेशः अतिकदः ५६ तदिच्छेति। कुमारसंभवे कामं प्रतीदमुक्तिरियं हे काम तत्तस्मात्तसिद्धौ कार्यसिद्ध्यर्थं गच्छ। कार्यं किं तत्राह
देवानां सर्वेषां नममेव कार्यस्केदोस्यन्निरूपंकुरु। शिवयोः संगमे कलम्भे स्मिन्नर्थे किं मयेति शंकायामाह। अर्थीयमिति। अर्थं निरेण उमामहेश्वर
संगमे न लम्भ एव लभ्योपि अस्यैकदेशः निरूप्योर्थः अंगस्य तस्य लब्धे लाभाय प्रसयः शिवस्य पार्वतीवशतासंपादनेन कारणं अर्था तत्त्वामपेक्ष
ते। अत्रोमामहेश्वरसंगमस्य वस्तु मयोग्यत्वाद्दृष्टांतरत्वेनोक्तिः कः। किमिव। वीजांकुरः उदपात्प्रागंभोजलमिवेत्यर्थः। अंगेति कामसंबोधनमिति
केचित्। उत्सयमुत्तमंत्वामिति एचिसाठः अत्र चतुर्थ्यंतपदद्रूपेकदेशः ५७ पश्येति। तत्रैव हिमालयवर्णनम्। पश्य हिमालयः। शिखरैः करणीभूते
र्मां नुमन्ना गैरिकादिधातुमतो भावस्तत्तां विभर्त्तीत्यन्वयः कीदृशी अप्सरसां विभ्रमार्थं विलासार्थमंडनान्यलंकरणानि तिलकपत्रिकादीनि तेषां
संपादयित्री विभ्रमेणासंध्याकालभ्रमेण पानिया निमंडनानीत्यर्थः अत एवाकालसंध्यो त्प्रेक्षेति केचित्तु तथा वलाहकानामेघानां छेदेषु खंडेषु वि

६०

60

भक्तो रागोपस्मात्तथाभूतं· अकालसंध्यामिवेत्युत्प्रेक्षा· तदकालेपि नुहृद्रासनात्· अकालसंध्या वर्षासंध्येति दीपिकायां· चित्रमेघच्छत्रः संध्यातु
स्यकाल इति महेशः· एतन्मतेनूपमापि संभवति· संध्याया अपि निमित्तत्वेन मंडनसंपादकत्वात्· वलाहकच्छेदेषु विभक्तो रागोपस्मामिति विग्रहात्तु
विशेषणाद्वयान्वयो बोध्यः· अत्र मते त्स्येकदेशः· स्त्रीवार्थेमुत्प्रसिद्ध इति निहतार्थता ५८ आदाविति· रुदंत्या विरहातुरायाः कस्याश्चिद्रूणनमिदं· कु
रंगेत्र गाकाममतिशयेनाश्रुपयसासंपृक्तैवदृशां निषेकं कुरु तद्दलन्वयः उत्प्रेक्षते· चेतोभुवो देवस्य मदनस्य मल्लीनां वाणाविशेषरूपाणां या
नकर्मैवेति इवशब्दस्यार्थवशाद्विलक्रमत्वं· धाराते क्षणायासे र्यंके नलिप्याः अंशो संतापपयसाक्षालनं यानकर्मस्वरूपं· तत्रलेपतापयोः संपाद
नाय दृशां विशेषणाद्वयमाह आदाविलादि आदौ प्रथमं अञ्जनपुंजेन लिप्तवपुः स्वरूपं यासां तथाभूतानां· मल्लीनामपि पंगाइ चूर्णाजनेन लेपा
तथाभूतत्वं· ततोनंतरं श्वासानिलेनोल्लासितः संधुक्षितोऽत एव प्रोत्सर्पन् सर्वांगव्यापी यो विरहानलस्तेन संतापितानां चेति भिन्नक्रमश्चकारः·
मल्लीनां तु भस्त्राश्वासानिलोल्लासितेन प्रोत्सर्पता विरहसदृशेनानलेन संतापितत्वमवसेयम्· अत्र दृशामिति बहुवचनमनर्थकम् ५९ चा
पेति· रावणहंतस्य परशुरामं प्रतीयमुक्तिः· हे राम तव चापाचार्यः धनुर्वेदाध्यापकस्त्रिपुरविजयी महादेवः तथा कार्तिकेयः स्कंदो विजेयो वि
जितः शत्रैराग्यस्ततउ भारितो उदधिः सदनं गृहं इयं भूः पृथ्वी हंतकाः ग्रासबोडशकरूपानि थिमिक्षात्महृत्क्षत्रपायदत्ते त्यर्थः· एतदत्स्त्येव· नवास्या
प्यत्र संदेहः· किमुक्तिं तु रेण कामामातुः कंठबाधां कंठच्छेदनं कृतवतां तवपरशुनावद्धस्पर्द्धैस्वैइहास्तनामारावणास्य खड्गो लज्जते इतिभंग्या एवं विध
निंद्यकर्मकारिणा त्वया सह स्पर्द्धितु रावणो लज्जत इत्युक्तं भवति· हंतकारो तिथिदानमंत्रः· तत्संबंधात् भूदेवतयेति महेशव्याख्यानं तु· ग्रासप्र

राम·
६०

मारणाभिक्षास्त्रादयं ग्रामश्चतुष्टयं ग्रामसंचतुर्गुणं प्राहुर्हेतुकां द्विजोत्तमा इति मार्कंडेयपुराणवचनानालोकननिबंधनत्वादनादेयम्· अत्र विजे
य इति पत्रस्य यः कृत्यपर्यायार्थो वा च कः ६० अतिपेलवमिति· शठः कालकूटेन विषेणाघटितमिव हृदयं यस्य हृति· तथा च कृत्रिमतया तत्काममग्रहैय
मिति मित्रं यस्यामस्योपदेशोऽयम्· अत्र पेलवे स्येकदेशो कपाटभावाया तृष्णारूपगुणयोगबोधकतया व्रीडादापी ६१ य इति· कस्यचित महापुरुषस्य प्र
शंसनमिदं· सोयं पूर्वोक्तगुणवान् महापुरुषः कस्यचिदेवपुण्यशालिनः पुंसो दृशोः पततिगोचरीभवतीत्यर्थः सकः यः सुरसरिद्गंगा तन्मुख्यानि त
त्र धमनानि तत्स्यभूतीनि वापानि तीर्थानि तेषां सार्थसमूहे स्नानेन तथा शास्त्रस्य वेदांतादेः परिशीलनेनाभ्यासेन यत्कीलितं संस्कारदाढ्यं तेन तत्पूयते
पवित्रो भवति· कीदृशः सोजन्यमानयोर्जनिहृत्सन्निस्थानं· तयोर्जनिहृत्सन्निर्यस्मादिति वा सेजन्यमान्येति पाठे सौजन्येन मान्यां जनिहृत्सन्निर्यस्येत्यर्थः
ऊर्जितानां बलवतां· ऊर्जितं बलं· ऊर्जितानां बलानामपि बलमिति वा· अत्र श्रूयेत्येकदेशो विद्युतरुधिररूपपूयव्यंजकतया जुगुप्सादायी ६२
विनयेति· हे अंग यः सततं विनयप्रणापये रेकैकेतनं स्थानं तादृशः तत्त्वगुणावत्त्वेन प्रसिद्धोऽभवत् सोघतस्याभिषेतमभिमतं पदमर्थान्नीचं समाग
तः प्राप्तः सन् तद्भूतपूर्वं वत्कथमीक्ष्यतां दृश्यतां· नीचपदप्राप्त्या गुणाविलोपादिति भावः तदेतत्सत्वाप्यं पति कस्यचित्पूर्वं प्रवृत्तमेत्री कस्य पुरुषस्य वृ
त्तांतकथनं· केचित्तु· नायिकायाः सखी पतिनामयकवृत्तांतोक्तिरियं· अंग हे सखि यस्तादृशो नायक आसीत्सोघतस्याः सपत्न्या अभिषेतं पदं समागतस्तद्भूत
भूतत्तद्भूतस्य वत्कथमीक्ष्यतां अन्यथा दृश्यते इत्यर्थ इति योजयंति· अपेते स्येकदेशो मंगलार्थः ६३ कस्मिन्निति· अस्य· पुरुषस्य· उत्तयते· दीप्यते· अत्र च
रेस्येकदेशो भूतपूर्वे चरडिति चरट्प्रत्ययो वा· चरे इत्व इति दातस्य धातुर्वेति संदेहात्सर्वसाधुदिति वाम्याधश्चरतीति वार्थ इति संदेहः ६४ किम्बिति· भूपा

६१

61

कं ८६

लमौलीनांमालात्वेनाध्यवसितायंक्रित्त्वमहामणेर्महस्थानीयमतो ऽस्य राज्ञः किमुच्यते किं वर्ण्यते न किमपि वर्णयितुं शक्यं यस्य तेजः वचो वा गो
गीर्वाणो देवैः सुदुर्लभं विभाव्यते ज्ञायत इत्यर्थः । यत्तु भूपालमौलिरत्नमालामहामणेरिति महेशेन व्याख्यातं तदसंबद्धत्वादुपेक्षणीयं । अत्र च चः श
ब्देन स्वशक्त्या निरूपित वाचकत्व संबंधेन गीः शब्द एव लक्ष्यते । गीर्वाण शब्दयोरेव मिलितयोर्देवेषु रूढत्वात् । न च शब्दलक्षणायां रूढिः प्रयोजनं वेति
नेयार्थत्वम् ६५ अकुण्ठेति । लापिका संगमोत्सुकस्य कस्यचिदिय युक्तिः हे कलकण्ठि । कलो मधुरस्वरस्तद्युक्तः कण्ठो यस्यास्तथाविधे इति दूती संबोधनं । वि
रहातुरतया कोकिलाया वा । मां कं वु कं काः षो त्वं सदृशगीवाया । नायिकायाः कण्ठेक्षणं कुरु । तदालिंगनशालिनं कुर्वित्यर्थः । कण्ठस्या ह्नि तदालिंगनोत्सु
कारूपामुद्रुः । कीदृशं मां । आकण्ठपर्यन्तं । अकुण्ठ अप्रतिहता उन्नतेनारंवर्द्धमानेति याव तत्तथाविधा या उत्कण्ठा तया पूर्णं व्याप्तमित्यर्थः । अत्र मृगणो
अप्रतिहता उन्नतेनारंवर्द्धमानेति याव तत्तथाविधा या उत्कण्ठा तया पूर्णं व्याप्तमित्यर्थः । अत्र मृगणो अटवर्गादित्यादिना प्रतिषेधात् ठकारः प्रतिकूलः
६६ देश इति । चेत्परसंहारे ऽश्वत्थाम्नः कर्णप्रतीपयुक्तिः यस्मिन् अरातीनां शत्रूणां शोणितरूपे जलैः पंचहृदा पूरिताः अर्थात्स्वशुरामेण सोयं कुरुक्षे
त्ररूपो देशः । तातस्य द्रोणस्य केशग्रहाद्धेतोः क्षत्रात क्षत्रियाद्वधः धृष्टद्युम्नात्तथाविधः कार्त्तवीर्यार्जुनाज्जमदग्नेरिव पराभवः । अहितानां शत्रूणां यादे
तयः शस्त्राणि तेषां घस्मराणि भक्षकाणि अत एव गृहणि श्रेष्ठानि मे मम भास्वंति भास्वराणि अस्त्राणि ब्रह्मास्त्रादीनि तामेवः यानि मत्ता जेनपतनुभ्यभा
त्त्वामानि । अतः क्रोधनो द्रोणात्मजो महत्क्षणो जनः । यत्र रामेणापरशुरामेणाकृतं पितृवैरनिर्यातनं तदेव कुरुत इत्यन्वयः । अत्र ऋौद्रे मृदग्धोवर्णाः
प्रतिकूलाः ६७ प्राणिति । हतपिनाकधनुर्भंगरामं प्रतिभार्गवस्येयमुक्तिः सपरशु क्षणाजत्वत्कण्ठपीठातिथिर्भवतीति संबंधः स कः येनाते न पर

राम
६१

शत्रा हरो देवः जगत्सु खंडपरशुरिति ख्यायते रिपुखंडनेन तन्नामत्वेन प्रसिद्धः कियत इत्यर्थः तेन पद्मनुत्पला खंडितं तत्परशुनात्वमपि खंडनी
यइति ध्वन्यते । कीदृशः परशुः प्राक्पूर्वं न प्राप्तो निशुंभो नमनं भंयो वा येन तथाभूतस्य शोभवस्य शंभुसंबंधिनो धनुषो या द्वैधाविधा द्वैधीकरणं तेन
विभवरूपः क्रोधस्तेन प्रेरितो यो भीमो भयानक्तो मार्गवस्य भमभुज एव स्तंभस्तेनायं विद्धः क्षिप्तः अत एवाशिथिलो वेगवत्तरः तथा उद्गताज्वालादीप्ति
र्यस्य तथाभूतः अत्रागच्छतः परशोरनिवारणीयत्वयोग्यता नापातिथितोक्तिः । तस्य च पीठारोहणोचितस्य तत्पीठत्वारोप इति बोध्यं । अत्र चतुर्थपादे गुरुस्य
रणोनभावो द्वैकान्तरोचित्स्येन मसृणवर्णविन्यासः पादत्रयेतु रौद्रप्राधान्यात्तदुचितो विकटवर्णविन्यास इति । ८८ धीर इति अत्र सदृइति सावधारणं । तेनात्र
जगति सएव नृपो धीरत्वादिगुणयुक्त इत्यन्वयः । वः । अस्य आकारो यस्य सः । यस्य मृत्साः सेवकावलेनोत्सिक्तादृप्ताः बुध्या प्रभया तेजसा चान्विता युक्ता इत्य
र्थः । अत्र पूर्वार्द्धे गौडत्वसामित्पाद्दिमर्गो यथा तादृक्तराईंचनस्रो यातवंधशैथिल्यम् । ८९ राजन्निति । हे राजन् भवत स्तानि चरितानि विभांति शोभंते या
नि रसात्तलेयातालेऽतः गभीरप्रदेशेनं दोर्घृतिं दधति धारयंति रइवस्त्राकाशमानीनि संतीत्यर्थः धीनीत्यनुसारिणी बुद्धिः दोर्बलं बाहुबलं ते उभे वि
जयस्य संपदं संपत्तिं एत्य प्राप्य भातः शोभेते । किंभूते आत्तते अतिविस्तृते । उचितयोरवसरयोरनुवर्तनी अनुसरणे आनत्वतीकुर्वाणे । यथोचिता
वसरानुसारेण प्रवर्तमाने इत्यर्थः ॥ उचितानुवृत्तिमिति काचित्पाठः । तत्र उचितानुवृत्तिं विजयसंपदं चातत्वती धीदोर्बले इत्यन्वयप्रदर्शनं तु दीपि
काकृतामयुक्तं । संनिहितत्वपासंपदमित्यनेनान्वययोग्यस्य एतस्येत्यस्याध्याहृतेनत्वामित्यादिनान्वयस्य उचितत्वात् । चकाराभावाच्च । एतस्य त्वएए
वेति पाठे तु निरवद्यं । एषु चरितेषु मध्ये । उचितेत्यादे धीदोर्बलविशेषणत्वं तु नुमागमप्रसक्त्यां ह्निनीइति हृष्यपन्ने प्रक्रमम् । अत्र पूर्वार्द्धे अनित्य

नै० ४

तयोरैहिकं संध्यभावः सकृदपि दोषः उक्तराद्धे· त्वाद्‌द्वेद्विवचनं प्रगल्भ्यमिथ्यानुशासनिकप्रगल्भ्यसंज्ञाप्रयुक्तत्वादसकृदेवेति ७० तत इति· पतिंवरां
प्रतिसख्या इयमुक्तिः ततः पूर्वोक्तास्तित्वनुरयमुदित उत्पन्नः कस्मात्क इव· उच्चैरस्तुच्चाद्‌दुदयाचलादिंदुरिव· कीदृशः उदारैस्तां महतां हारैस्तां हारिणीम
नोहारिणी यतिर्यस्य सः· इंदुस्तु उदा इहारवजनहारिद्युतिः एवंविधोयं निजवशं मुक्तामणिवच्चकास्ति दीप्यते· मुक्तामणेरपि वंशोस्ममुत्पत्तेः कीदृशः
उदात्ता उडूराकांतारमणीया कांतिर्यस्य तथाभूतः तथा अनखीः श्रेष्ठः अमूल्यश्चेति· अत्र यलोपासिद्धत्वप्रयुक्तः संध्यभावः ७१ वेगादिति नायका
धिष्ठितं संकेतस्थानं वोधयंत्याहृत्या इयमुक्तिः हे सखि अयं पत्रीयक्षी वेगाद्‌दुड्डीयगगने चलन् उन्नयते उन्नतो भवति ततस्तस्माद्दैवप्रदेशे हृचिंश्री
णिं अवस्थितिमितियावत कुर्वित्यन्वयः कीदृशः डामरमुड्डटचेष्टितं यस्य सः· डामरं डमरुवाद्येतद्वच्चेष्टितं यस्येत्यर्थः इत्यन्ये· अत्र चलं डामरेति हृचिं
कुर्विति चिंसन्निकर्षरूपसंध्यपस्यापि ताभ्यां लेडाचिंकुशाद्वाभ्यां पुंव्यंजनयोस्संकुरयोः प्रतीतिरित्यश्लीलः संधिः· लाटदेशभाषायां चिंकुशब्देन योन्य
ग्राभिधानादिति ७२ उत्कंपिनीति· अभ्यगं प्रतिकस्यचिदुपदेशोक्तिरियं· अत्र महद्देशस्यांते समीपे चारुरवस्थितिर्यस्यास्तथाभूता उर्वी महती नवीली
तहूपंक्तिरस्तीतिशेषः अत्र सज्जुपथास्तान्तथागंतुं न युज्यते तत्तस्मान्मनागीषत्‌शिरो नमय नीचैः कुर्वित्यन्वयः· श्रम नेद इति यागे जन इत्यध्याहार्यं·
अत्र संधेः श्रुतिकटुत्वं ७३ अमृतमिति· अत्र द्वितीयममृतपदं स्वादुतरत्वरूपार्थांतरसंक्रमितवाच्यं· स्वादुतरतायोगव्यवच्छेदो व्यंग्यः तथा चामृतं अ
मृतं स्वादुतरं अत्र कः संदेहः मधुन्यपि अन्यथा अमधुनि मधुन्येवेत्यर्थः मधुरात्पठेतियावत· चूतस्याम्रस्यापि प्रसन्नरसं स्वच्छरसं फलं अधिकं
मधुरं· कः संदेह इत्यपेक्षते· पुनरितिपर्यंतिस्वार्थकं· परंतु रसानां मंतरं तारतम्यं वेत्तीति तथाभूतः रसानामांतरं मर्मवेत्तीति तथाभूतो वा जनो मध्य

स्यः पक्षपातरहितः सन्निह जगति प्रियापादशानच्छदादधरात् तदपेत्यर्थः स्वादुमधुरं पदस्य तस्मात्सकृदेकवारमपि वदतु· तथा च न ताव
शं जगति विद्यत इति भावः अत्र हरिणीछंदः रसषड्वेदवर्णसमुचितायायते चतुर्थपादगते षड्हेति वर्णभंग इत्यप्यर्थत्वं ७४ जयश्रीतिपरस्परि
हर्तुं तीर्यते मनागपि नसौ दर्पगुणोन अथ केवलं परस्परदोषः प्रतिपक्षैरपि प्रतिपत्त्र इति संस्कृतं·मानवंती प्रतिद्वन्द्वाः समाधानोक्तिरियम्· तथा
विधमेतत्कोमचेष्टितं यत्सौंदर्यगुणोन रमणीयताद्येगुणोन मनागीषदपि परिहर्तुं न तीर्यते न शक्यते· अथ च परस्परदोषः पूर्वोक्तापरिहार्य
त्वरूपः प्रतिपक्षैरपि चस्मचार्यादिभिः केवलं प्रतियत्नो गीकृतः न तु परिहृतः त्वत्कांतस्य तु कैवकथेति तस्माद्देवादन्सव नितासंगमेपि कोपानिश
यो न विधेय इति भावः अहेतस्य यमित्यर्थकमिति चंडीदासः अन्ये तु पः परिहर्तुमिति संस्कृतं प्रदश्यं यो नायकः सौंदर्यगुणेन अपराधत्रीलोपि
त्र्कुं न शक्यते· परस्परदोषोऽपराधः प्रतिपक्षैरप्यस्माभिः केवलं प्रतियत्नः पूर्वार्द्धोक्तप्रकारेण समाहित इति व्याचक्षते न त्र यथा स्थितपाठे य इति
संस्कृतप्रदर्शनं कथं संगच्छत इति चिंतनीयं· जोपरिहर्तुमिति हितदा प्राकृतपाठे न भवितव्यमितिः अत्रार्यायां द्वितीयस्य हर्तुमित्यं तगुणो
सगणास्यतीर इइ इति तृतीयस्यादिगुरोर्भगणस्य चाश्रयत्वं छंदः शास्त्रसिद्धंः ७५ विकसितेति· वसंतः मुनेरपि मानसं हरतीत्यन्वयः कीदृशः विक
सितानां सहकाराणामाम्रवृक्षाणां तारउद्गतो हारी मनोहरश्चयः परिमलस्तेन गुंजिता गुंजनयुक्ताः पुंजिताः पुंजीभूताश्च द्विरेफा भ्रमरा यत्र तथा
भूतः· अथवा तथाविधः परिमलो यत्र स चासौ गुंजितपुंजितद्विरेफश्चेति विग्रहः मुनिमनोहारकत्वसमर्थनाय वसंतगतप्रकर्षीधायकतया वि
वक्षितस्य तथाविधपरिमलस्य शब्दतो वसंतान्वयत्वं भवेत्यार्थतत्संबंधानुधावनस्यानुचितत्वात्· पुनः कीदृक्· नवकिसलयानि नवपल्लवा एव चा

६३
63

रुणि। मनोहरणिते: श्रीः शोभा यस्य सः। अत्राद्यपादांस्य स्पर्द्धिकारस्य गुरुत्वानुशासने पि तत्कार्यक्षमत्वमत्र व्यक्तं ७६ अम्लाना इति। कस्यचि
द्राज्ञो वर्णनमिदं। स एव अपुनर्वाविधिना पेः पदार्थैः सह उत्पादितः। ताः तदंतर्गताः गुणाः रूपाणां रत्नानां संवंधिभ्यो रोहणास्य रत्नोत्पत्तिस्थानभूतपर्व
तविशेषस्यापुर्वोभूमयः। अम्लानां विलक्षणाइत्यर्थः एवमग्रेपि। भूत। उपादानभूतपार्थिवभागः उपकरणानि। सकः। यत्र यस्मिन् दृष्टे सति द्विषां करत
लादस्त्राणि पतंति स्त्रीरत्नानि तं वक्ष्यलादस्त्राणि च पतंतीति संख्या मदित्यादि। भूतैस्तादिच द्विषां स्त्रीणां च विशेषणं। मोहश्च द्विषां भयप्रयुक्तः स्त्री
णां तु कामावेशादिति रूहवीर्यं। यत्तु पैरित्यत्र यद्धवगुणारत्नयन्मंत्रहितैरिति शेषः तदेवतत्सदत्रयाकांक्षारणादिति महेशेनोक्तं। तदयुक्तं। याभिश्च
याभिश्चपेश्च पैरित्येवं प्रमानत्रित्रये सानुशासनिकैकशेषाभ्युपगमे नैवोपपन्नो दिति। अत्र श्लोकांतस्य गुरुकार्यक्षमत्वं ७७ हानूयेति। दाक्षिणत्ये तदी
यानां विलासोपं। मुग्ध। सुंदर। सभांतरे समामध्ये रत्नभूत। त्वं कुगतो स्तितव संवंधिनएते ईदृगवस्थो वं यच कचन खंडेगता: स्म इति शेषः। मुग्धानां सुं
दरीणां विदग्धसभानां मंनरेरत्नभूते समर्थ इति महेशः। प्रत्येकं हा पदेनन्वयत्वादेः प्रत्येकं प्राधान्येन शोकोद्दीपकत्वं व्यज्यते। इदंदोधकहृत्तं हास्य
व्यंजकतया शोकानुगुणम्। ७८ तथाभूतामिति। तृतीयो ह्रासएव व्याख्यातमेतत्। अत्र वल्कलधरैरित्यस्य विशेष्यसाकांक्षत्वात् स्थितमित्यस्य
स्य च कैरिति कर्तृसाकांक्षत्वादस्माभिरित्यपेक्षितं। तं। तथा खेदमित्यनंतरमित्यमित्यपि अन्यथा खेदस्य पूर्वोक्तार्थहेतुकत्वालाभेन हेतुसाकांक्षता
यत्रैर्मात्स्यर्यानोचित्या परिपोषाद्वेति न्यूनपदत्वम। नच दृष्ट्वा विवेइत्यन्वयादित्यमिति व्यर्थमिति वाच्यं। दृष्ट्वेत्यस्य गुरुणोवान्वयात्। अन्यथाऽनौचि
त्यासंगतेरिति दिक्। ७९ स्फुटिकेति। कस्यचिद्विदग्धोवर्णनं। सप्रकृतो विद्वान्कोपि लोकोत्तरइत्यर्थः। कीदृक। स्फटिकाद्वतिवत् निर्मलः स्वच्छांतः क

राम.
६३

रणः अत एव वप्रकामं अन्तः स्वर्थ प्रतिसंक्रान्तं निशान्तं नीरसमतीत्यामति वेद्य मितियावत् शास्त्रं तं त्वशास्त्रस्यास्या बाधितार्थोपपन्नतथाभूतः एवमविरु-
द्धासमन्विता संगता उक्तियुक्तिः उक्तियोजनाय स्य सः अविरुद्धपदाया न्ययासमन्विता उक्तियुक्तिर्येन स्वर्थं इति केचित् अविरुद्धेऽर्थे समन्विताः सं-
बद्धा उक्तयो यस्य प्रयस्येत्यन्ये पुनः कीदृक् प्रतिमल्लानां प्रतिवादिनां मत्तमयस्य लक्षणापाप्यरामवः सोदयः प्राडुर्भावो यस्मात्तथाभूतः कदापि के-
नाप्यपरिभूतानामपि पराभवकर्त्ते स्वर्थः एतेनोदयपदस्याधिकापरिहारः प्यद इति मित्रपदलेन महेशकृतं व्याख्यानमनादेयं अन्नाहृतिपदमधिकं ८१
इदमिति रहुजगातिपुंसां जराखपि दृष्टा वस्थो स्वपियतमान्मथः काम संवेधी विकारः इदमनुचितं वैरस्याधायकत्वादयुक्तं तथा अप्रमक्रमः अप्रशस्तप-
रिपाटीकु संप्रदीपइत्यर्थ बाल्ययौवनजरासु विद्याविषयोपभोगधर्मोः इति शास्त्रोक्तसंप्रदायस्येवावस्थानुरूपतया समीचीनत्वात् नगेऽप्राशस्त्यार्थकत्वात्
यदपि च स्त्रीणां द्रीवितं रतं वास्तनपतनमवधि कृत्वा वधिर्यत्तथाभूतं नकृतं अर्थाद्विधान्नात तदप्यनुचितं पूर्वोक्तादेव हेतोः अत एव कुसंप्रदायश्चेति
यो उपं अप्रोत्र अनुचितं लोकविरुद्धं अक्रमः शास्त्रक्रमविरुद्धइत्यनुचिताक्रमयं दयोरर्थमाह तदयुक्तं जीवितरतयोः स्तनपतनवंधर्यताकरणोतदसं-
भवात् नहि स्तनपतनानंतरं जीवितरतयोर्लोकविरोधः शास्त्रविरोधोवा कश्चापि संमत इति पूर्वोक्तमेव साध्विति अत्र कृतमित्यधिकं ८२ अधिकरतलेति
करतलेकपोलमाधाय चिंतयंतं नापि कांप्रति सत्पोऽइयमुक्तिः हे सुतनु करतलरूपे तल्पेऽत्यधिकरतत्वं समम्यर्थोऽव्ययीभावः कल्पिता स्वापलीलायपा-
त्याभूता परिमलनेनकरतलघर्षणेन रक्तिमोदयात् निमीलन्निति रोभवन्पांडिमायस्यास्तादृशीतवगंडपाली गंडस्थलीकं त्रीकाप्यपूर्वस्मरनाथपतेर्लीलायां
वशीकरणाद्रूपायो वाराज्यस्याभिषेकं अजसात्त्वतः व्यंजयति सूचयतीति कथयेत्यन्वयः यः स्मरेण स्वतः कर्तुमशक्यं तत्वेवं धिसा याप्यादिकरोति स प्रकर्व्यंह

ड्डीनस्मरे रागत्वरान्ये मिथिक्ता इति भावः अनेन कंदर्पादप्यधिकं वशीकारकत्वं व्यंजितं भवति· अत्र लीलेत्यादिः प्रयोगात्कथितपदत्वे ८२ शाकः क
इति कस्कादित्वात् नुकवत्क इति युक्तः पंचाननः सिंहोपतः पत्त्मात्रसिंह्मां स्त्रेहेनयो विलासः कंडूपनादित्ते नवद्धास्थिरीकृतावस्ततिःस्थितिर्येन तथाभू
तो वर्तते अतः कः कः शूकरः कुत्र न घुरेत भीमशब्दं कुर्यात अपितु न मम मध्यमाधमरूपः सर्व एव सर्वत्र· घुरभीमार्त्तशब्दयोरिति दीपिकायां घुरेत्यर्थटे
दिति महेशः॥ कीदृक्· घुर्घुरायिता· तादृशशब्दवती या घुरी नासिका तया घोरः भीषणाः· घुरी पोत्रं सूकरमुखाग्रमित्यन्ये· घुरी वाद्यविशेषस्तद्वत् घोर
इत्यपरे· एवं कः कः करी हस्ती कमलानामाकरं उत्पत्तिस्थानं विगतकमलं कर्तुं नो यतः अपितु सर्वः सर्वमपि· केके अरण्यमहिषाः कानि वनानि नो स्म
रन्त्यपितु सर्वाणि· स्वाश्रयोन्मूलेनेन मदोत्कर्षं सूच्यते· एवं च राजनि व्यसनशीले क्षुद्रा अपि भौमिका निर्भयो दामवंतीति प्रस्तुतध्वननादप्रस्तुत
प्रशंसालंकारः अत्र वाच्यस्य सूकरादेरुत्तरोत्तरमुत्कर्षतया तथैव समुचितस्य वधप्रकर्षस्य भंगः उत्तरोत्तरं तदपकर्षस्य स्फुटत्वात्· ८३॥ केंकार इ
ति· स्वगृहं प्रतिप्रस्थितान् पथिकान् प्रति कस्यचित्कवेरियमुक्तिः त· स्याः कंचुलिकाया अपसारणोर्थात् भवद्भिः॥ क्रियमाणे सति यो भुजयो रास्फेयोस्भू
ननं तेन सवलंतां कंकणानां क्वाणाः शब्दः वो युष्माकं प्रेमप्रीतिं तनोत्विति संबंधः कीदृश इत्यपेक्षायां केंकार इत्यादीति पंचरूपकाणि· केंकार इति धनुर्ध्वने
रनुकरणं· सुरतक्रीडार्थं पिकानां एव वा पिकाः कोकिलाः रतिरेव विलासादिफलोत्पत्तिस्थानत्वान्मंजरी तत्संबंधिनां मधुलिहां संकारः· रतिमंजरीमधु
लिहां लंपटनयात त्वेनाध्यवसितानां कामुकानां संकारो हर्षोद्भवचुंबनादिशब्दः तद्धेतुतया तत्त्वोपचारः आपृष्टमिति वदितिकेचित· रस्यपर्यायमंजरीतसं
बंधिनां मधुलिहामित्यन्ये· रतिरेव मंजरी मधुलिहस्तेषामिति दीपिकायां· लीलार्थं चकोरी लीलैव वा चकोरी इति पूर्ववत्· नवं वपत्तारूपं तस्य लास्यापत

त्ताढूलासादिरूपं न्त्साय वेणुस्वनः वंशीध्वनिः नवं वयो यस्यास्ता दृश्या स्त रूपालास्याय सुरतरूपनृत्साये तिकेचित् अत्र समास मेव नाकं न वेत्या
दि विशेषणो न स्यान्वयायपुनरूपात्रम्॥ ८४॥ मस्तरोतिजनक पुत्रीसा तायथिमार्गे पथिकानां वधू भिस्तु प्रोर्ल्लेचनेर्वीक्षिताइतिपूर्वोक्त प्रकारे ण शि
क्षिता वेत्यन्वयः इतिकिं हे वायतीभूः सदर्माद र्भाकुरे ण हिता तत् तस्मात् मम सरोमंदस्थ रणाया नायेत्र तया गम्यतां एवं यतोघर्म आतपः कठोरस्तीक्ष्णास्त
त्रस्मान्मूर्ध्नि स्थिचयस्य वस्त्रस्यांतं प्रांतं विरचयेति अत्र पूर्वार्द्धान्वयिनत्तदिस्यस्यार्द्धा तरत्तगतत्वात्नतीति विलंवः ८५ येयामिति हनुमता लंकायां द
ग्धा पावी राक्षसान धिष्ठितः कस्य विद्यावशां यतीयमुक्तिः हेप्रभो ये येषां क्षयं चारिणां निशाचराणां प्रतापस्यो प्लभिः कर्त्तृभूते स्ताः प्रसिद्धाः त्रिदशानां दे
वानामिभस्य हस्ति न ऐरावतास्यस्य दानसरितः मदजलनद्यः पीताः शोषिताइत्यर्थः तथापेर्न दनसंद्रकी डावनस्य तरूणां छाया सुलीलयायतया
नमर्यातम यस्य तस्य भुवो भूमयः कस्मिताः रचिताः येषां कुंकतपोकुंकाराः कृतो मरयन्ते रिंद्रस्यक्षो भो याभिस्तथाभूता आसन्निति शेषः तैः क्षया चा
रिभिस्त्वपरिलोषकारिप्रवादो चितं सभायां कथनयोग्यं प्रवादस्य स्वरूपानेहचितं वा किंचित् किं विद्धिं तं अपितु न किंचिदित्यन्वयः अत्रपेरिस्य
क्षयाचारिपदार्थेनभिमतोन्वयोनभवति भिन्नविभक्तिकत्वात्॥ ८६॥ त्वमेवमिति नायिकां प्रतिदूस्याइयमुक्तिः हे सुभगेत्वमेवं दर्पमानोत्कर्ष
सौदृर्येयस्यास्तथाभूतासच प्रकृतनायकोपीत्यर्थः चकारस्याप्यर्थत्वात् रुचिरनायाः सुंदरतायाः परिचितः संवंधीइह संसारे कलानां चातुरीणां पर
सीमान्नं परां काष्ठां युवामेव भजथः आश्रयथः सीमांतमिति पाठेपि स्फुटस्वार्थः तत्तस्मात् इति एवं विधं वेयुव यो र्द्वंद्वे मिथुनं दिष्ट्या भाग्येन संवृद्
त्यपिपरस्परयोग्यमपि भवति अतः पूर्वोक्ताच्छेषमवशिष्टं समागमरूपं यदिष्टं तदानीमिह द्वंद्वे विद्यमानया गुणितान या जितं स्यादित्यनुषंगे

६५
65

णान्वयः तदैव गुणितायां उत्कर्षो ऽन्यथा वैफल्यादपकर्ष इति भावः ॥ शोभं परस्परं प्रेमेति तुल्यत्वान्नमयुक्तं तथा सति प्रेमगोः ॥ सिद्धत्वलाभेनामा
सनायत्ते रिति स्वतंत्रपदीस्वभावाद्यादिस्तस्य च तदर्थाविबोधकत्वादभिमतान्वयालाभः ॥ ८७ ॥ संग्रामेति ॥ संग्रामस्य वांगणन भयसंचारणसमारोपि
ते ॥ मौर्व्यामारोपिते सति ॥ देवेति संबोधनं ॥ येनयेन सह समासदिति पद्य समासादितं प्राप्यं तदाकर्णयेति संबंधः ॥ केन किं समासादितमित्याकांक्षाया
मुत्तरार्द्ध ॥ तत्र च समासादितमित्यस्य वचनादिविपरिणामेन समासादिताः समासादितः समासादिते त्येवमनुषंगो बोध्यः ॥ भूमंडलेन च राज्ञः स
मासादनं स्वस्वामितया स्ववशंगतत्वं ॥ ८८ ॥ चापाचापेइति ॥ प्रागेव व्याख्यातं ॥ चत्वारइति ॥ वेणीसंहारे दुंदुभिध्वनिमाकर्ण्य एतापत्तः प्रवर्त्तते इत्युक्ता
भीमस्योक्तिरियं ॥ चत्वारो युधिष्ठिरव्यतिरिक्ता वयंभ्रातरोऽकृत्विजः अथीसंग्रामाध्वरे ॥ एवमग्रेपि योज्यं ॥ सः सर्वज्ञत्वेन प्रसिद्धो हरिः श्रीकृष्णः कर्मणा
मुपदेष्टा उपदर्शकः सदस्यापरनामधेयः संग्रामाध्वरे दीक्षितोगृहीतनियमः नरपतिर्युधिष्ठिरः पत्नीः द्रौपदी तदुर्योधनवधपर्यंतं वेणीसंयमरूपं यं
यातथाभूताः सपत्नीकस्यैव यज्ञाचरणौचित्यात् ॥ कौरव्याः दुर्योधनाद्याः शतंपशवः तन्नुत्वतया वध्यत्वात् ॥ प्रियायाद्रौपद्याः परिभवः ॥ सभायां
केशांबराकर्षणादिरूपस्तज्जनितस्य क्लेशस्योपशांतिरेव फलं ॥ राजन्यानां क्षत्रियाणामुपनिमंत्रणायाह्वानायहतोदुंदुभिः स्फीतं स्निग्धं यथा स्यात्तथार
सतिशब्दायत इत्यर्थः ॥ ताडनेस्निग्धशब्दोदयाज्जयसूचनं ॥ पद्मोदुंदुभिरिति पाठे पशव एव दुंदुभिरिति रूपकं ॥ स्फीतमिति पशोर्विशेषणं वा ॥ ८९ ॥ जयेति
॥ व्याख्यातं प्राक् ॥ अप्राकृतस्येति ॥ रामेणधनुर्भंगे कृते जनकस्योक्तिरियं ॥ दृष्टेश्वेति भिन्नक्रमश्चकारेणाकृतत्वसमुच्चयः अप्राकृतस्य यत्किंचित्कौतुका
नाकर्षणीयस्य ॥ अत्यद्भुतेऽश्रुतातिशये पर्यादन्येवाहृतस्य वशीकृतस्य ममतथापि तेषु नास्थानादरइत्यर्थः ॥ अप्राकृतस्यलोकोत्तरस्य रावणस्य च

राम ॥
६५

रितातिशयैः कैलासांदोलनाद्यैरितिकेचित् · एवमुरोवर्त्ती रोमः वीरपिष्टुकाकृतिर्वा इव बालकाकृतिः अप्रमेयस्य अपरिमितस्य माहात्म्य
स्य सारगुणाः यः समुदायस्तन्मयः कोप्यनिर्वाच्यः पदार्थो वर्त्तत इति शेषः अप्रमेयं · अमात्रादृष्टमित्यर्थ इति कश्चित् · महेशस्त · चकारोऽप्यर्थे ·
तथा च दृष्टे रविचरितातिशयैर्हृतस्याकृष्टस्य मम तथापि नास्था · दशरथपुत्रे रोवधनुर्भंगमित्याश्चासो नास्तीत्यर्थः ननु वैदग्ध्याभावाद्यमनास्था
सत्त्वात्राहा प्राप्तत्तस्येति · प्राप्तस्तोऽविदग्धस्तद्विरत्नस्येत्यर्थः · तर्हि किं संभावयसीत्यत्राह कोप्येष इति · जनागम्य इत्यर्थ इत्याह ९० एषो हमिति उपाहृ
र रोत्स्वमे उषाऽनिरुद्धयोर्नास्ति एवं संगमं निगूढं स्वपाघागतस्य कामस्यैष मुक्तिः एषो हं कामः असुरराजं स्वावाणस्य सुतां उषां स्वप्ने अनिरुद्धेन
प्रद्युम्नसुतेन पापरनासमागमस्तेनाधिगतं शौर्यं अभिरूपं पौगण्डं लक्ष्म्याः सौंदर्यं श्रियः फलं यया जयथाभूतां विषादपसपाघग्राम आगतइत्यन्वयः

प्र६

कीदृशः अद्वितनया यामस्वयमाजन्मयस्य तथाभूतः · दाहानंतरं हरेणावरे दत्ते गौरीवदनात्कामो मरविरिति पुराणप्रसिद्धिः पुनः कीदृक् · सुरा
सुरमनोरथानां दूरवर्त्ती सुरासुरैर्मनसाप्यचिंत्यगतिरित्यर्थः · अन्यत्रैदियांतरगम्यत्व संभावनापत्तेः ९१ त्वयीति · विक्रमोर्वशीये उर्वशीप्रतिपुरू
रवस उक्तिरियं हे मानिनि मम कं अपराधस्य लवं लेशं पश्यसि यतो यस्मादपराधलेशाद्दासभूतजने मल्लक्षणे स जसीत्यन्वयः कीदृशस्य मम ·
त्वयि वद्धरतेः स्थिरानुरागस्य · तथा प्रियवादिनः एवं प्रणयभंगे पराङ्मुखं तद्गाढ्रूचेपस्य तथाभूतस्येत्स्यं विशेषणत्रयस्यापराधलेशाभावो
पयस्याभिप्रायगर्भत्वात्परिकरालंकारः अत्रापि लवमपीत्यवरूपं वाच्यं अन्यथा लवनिषेधे पि स्थूलसंभावनापत्तेः ९२ प्रियेणेति तितिक्षितान्
र्जुनीयेजलक्रीडावर्णने पद्यमिदं काचिन्नायिका प्रियेणाकान्तेनविपक्षसन्निधौ सपत्नीसमक्षं संग्रथ्य समर्पक ग्रथित्वापी वरोपी नोत्तनोय

६६
66

त्रेतथापि विधेवक्षसि उपाहितां निहितां जलेनाविलाम्लानामपि स्रजं मालां न विजहौ न परित्यक्तवती त्यस्वच्यपः कुत इत्याकांक्षायामाह वसंति
हीत्यादि॰ हि यस्मात् प्रेमिगणा वसंति न वस्तुनि॰ प्रेम सत्व एव वस्तुन उपादेयेत्वचित्ताकर्षकत्वयोर्द्दर्शनात्तदभावे चादर्शनात्तदन्वयव्यति
रेकाभ्यां प्रेमैवोपादेयं चित्ताकर्षकं च भवतीति तदेव गुणा वदित्यर्थः तथा च सपत्नीसमक्षं निर्माल्यप्रमपूर्वकं कांतेन हृदि निहिता याः स्रजः
जलाविलतया सौरभाभावेपि प्रेमास्पदतया अपरित्याज्यत्वं युक्तमिति भावः चक्रवर्तिनस्तु॰ प्रेमिणः सति वस्तुन्युत्कर्षो न वस्तुमात्र इत्यर्थ
मात्रः॰ प्रेमिणां गुणा उत्कर्षा न वस्तुनि॰ प्रेमोत्कर्ष एवोपादेयो न वस्तूत्कर्ष इति भावः॥ निद्रान्तरेस्त्रायमध्येऽत्र नकारोऽस्थानस्थः नकाविदपितुम
र्वीइति विरुद्धप्रतीतिप्रसंगात् ९३ लग्न इति॰। शितिकंधरस्य महादेवस्येंदुशकलेन चंद्रखंडेन निद्रांतरेस्त्रायमध्येऽत्र [illegible] कपोलस्थलं क
पोलस्थलमध्ये लग्नो मुद्रांकस्तदाकारश्चिह्नं च युष्मान् पातु रक्षत्विति संबंधः कपोलस्थलं तु महादेवस्येति केचित्॰ पार्वत्या इत्यन्ये॰ शितिकंधर
पदोपादानस्वारस्यात्तु चरमपक्ष एव युक्तः प्रतिभाति॰ कीदृशेनेंदुशकलेन॰ केल्याः क्री उपायः कचग्रहस्तेन श्लथा शिथिला या जटा तत्संलग्नं बंधस्तथा
भूतेन॰ एवं च कपोलसंबंधोपपत्तिः कीदृशो मुद्रांकः पार्वत्या नखलक्ष्मणा नखचिह्नेशंकितास्संजातशंका या सखी तस्या नर्मस्मितेन लीलास्मितेन या व्री
डा लज्जा तया हेतुभूतया करपल्लवेन प्रोमृष्टः मार्जितः तथा विधेस्मितेन व्रीडा यस्याः इति पार्वतीविशेषणमित्यन्ये पुनः कीदृक् कुटिलश्वासा या ताम्रष्ठ
वि॰ ईषदारक्तकांतिः इदमेव वचनखलक्ष्मयांकाबीजमिति ततः पूर्वमेवेतत्संदष्यानं युक्तं ९४ अघापीति॰ असौ दृश्यमानः शशी तत्क्षणो उत्सुकाद्धि
क सत्पत्रेकैरवं कुमुदं तस्य कोशः कुड्मल एव कोशः खड्गपिधानकं तस्मान्निसरतामलीनां श्रेणी पंक्तिरेव कृपाणः खड्गस्तं कर्षत्याकर्षतीत्यन्वयः कु

राम॰
६६

नरत्वाकांक्षायां हेतुमुत्प्रेक्षते अथापीत्यादि· एवमानः सीमंतिनीनां दरि अथापि मत्ता त्रिध्येपिस्यातुं वांछति सिकृनिंद्यामिति क्रोधादिवे त्यर्थः अ
त एवालोहित आरक्तः कोपेन रक्तो मोदयात्· हृदितिशासायां हेतुगर्भं तद्विशेषणमाह स्तनेति स्तनावेव शैलौ तद्रूपे रणदुर्गे विषमे अनाक्रमणीये· श
शीः कीदृक्· प्रोद्यंतो दूरतं प्रसारिताः करः किरणाएव कराहस्ता येन तथाभूतः खड्गाकर्षणोपि हस्तस्य तथात्वात्· प्रोद्यत्रिजिपाठे मित्रमवशाशिविशि
षणं· ततलक्षणादिति पाठे तत्क्षणात्कर्षतीत्यन्वयः· यत्वयापि· ममोदयेपीतिव्याख्यानं· तदयुक्तं आरक्तस्यैवोदयेनततः पूर्वमेव क्रोधकथनो विस्मात·
कोशोऽस्त्रीकुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः· अत्राख्याने दीर्घसमासः पूर्वार्द्धएव कुड्मलोक्तौ तदोचित्सात ९५ किमितीति· मानिनीव्रतिसख्या
रयमुक्तिः अत्रयादगतं यादवगणानां वृक्रुगणां हृदयनाथं किमिति नयस्यसि इमं कंठे गृहाण· मनसत्तमो रूपेको पंमुंचेति वाक्यात्रयं परस्परपदसंकीर्ण
म· ९६ पवेति· सख्युः अत्र संगतिर्न विधेयेति वाकं वदासीत्यादिवाकांतरे रोगगर्भितं· एवंच संगतेः सदसत्वसंशयो स्यपादे कामसाकांक्षत्वं चेति दूषकता
वीजमितिकेचित· ९७ लग्नमिति। अत्रास्तिपाछिरसतीत्वेन श्री राजपत्नीत्वेन कीर्तिश्च हृतीत्वेनाध्यवसिता वोध्याय स्यदनः कार्तिरंवुधिं प्रति गते
त्यन्वयः फलमुत्प्रेक्षते· प्रियोतियोगाद्राज्ञ्याइति संदेशां गदितं वक्तुमिवेति संदेशस्वरूपलग्नमित्यादि मत्यप्यइत्यंत दर्थ स्तक हे अंबुधे रागो
रुधिरं लोहितत्वमेव रागोनुरागस्तेनात्र तं मामसंगयस्मात्तथाभूतयायये वासिपदया खड्गयष्ट्या इह संग्रामे अरीणां कंठे सद्दृढयथाः स्यत्तथाल
ग्नेयाचासियष्टिः इह संग्रामेमानंगागजाएवमातंगा श्वंडालास्तेषामुपरिपतंतीपरेषां आशंक्रणां पुरुषैरेवपश्चकृष्टपुरुषैर्दृष्टा· तेन पश्चकृष्टसाक्षिस
त्वान्नमिथ्यात्वशंकानिरासः· तस्मात् खड्गयष्ट्यासक्तः संबद्धएव तत्स्यां प्रकोपाचरक्तः अयं ममभर्ता राजानकिंचित् प्रत्युक्तायुक्तं गणयति विचारयति·

यथाक्रंतत किंचित्पादूरत्यादिकं नगराणि पतीत्यर्थः तेन पुरुक्षा पुरुक्षगणानां सा चेव हेतुना अहेमत्सेम्योदन्नाम्नि इदं तेन मत्पितुर्विदितमस्त्विति तेन
राज्ञेतिकर्त्रीहिं तत्तीये ति केचित्. एवं पक्षे अंगं रेखाविशेष इति दीपिकायां. एवमनया मंगणशोर्यदाज्ञत्यपशसा मुत्कर्षो वर्णितः अत्र मत्सेम्यइरसं
नवाक्येकवाक्यमध्ये विदितमित्यादिवाक्यांतरं प्रविष्टमिति विशेषः ९८ महाप्रलयेति. वेणीसंवरतो रणकोलाहलमाकर्ण्य यतो ऽम्पत्याम इय
मुक्तिः अघायं समरोदधेः संग्राममहोदधेः संवंधी तत्सकाशाद्वा पूर्वमभूतो ऽभूतपूर्वो रवः सिंहनादः कुतः कस्माद्धेतो रत्नीति प्रश्नः कीदृशः महता
प्रलयमारुते नक्षुभितानां पुष्करावर्तकानां मेघविशेषाणां प्रमुदुर्वीरं रचंडउग्रघनं निविडं च यद्गर्जितं तस्य प्रतिरवस्य प्रतिध्वनेरनुकारी सदृशः
तथा अर्वरायो भैरवः भीषणः एवं स्थगिता आच्छादिता व्याप्ता इति यावत् रोदसी द्यावापृथिव्यौ येन तत्कालमेव कंदरागुहा येन तथाभूतः॥ अत्र रवश
ब्दस्य मंडूकादिशब्द एवक विप्रयोगप्रसिद्धिर्नत्वेवं विधे वीराणां गर्जिते इति तदतिक्रमः ९९ नाथ इति. निशायानाथे चंद्रे नियते दैवस्य नियोगाद
स्तंगते सति निशायितदूधूरस्तंपाता. हंतेति हर्षे. स चेद्दशा ऽनुरूपता न. इदमेवार्थांतरन्यासेन समर्थयति. कुलांगनानामिति. हि यस्मात्कुलां
गनानां दशानुरूपं पयति विनाशादशायोग्यं अतः अनुगमनात्परमन्यत्मद्रतरं शोभनतरं न समस्तिनास्तीत्यर्थः॥ अत्र गतेद् इति गमिधातोः प्र
क्रमादानेपित त्प्रयोग एवोचितो न तु यातेति या धातोरितिप्रकृतेः प्रक्रमभंगः १०० उदेतीति. निगदमातं. एवं चोद्दिष्टप्रतिनिर्देशरूपतया
कथितपदत्वाख्यदोषानवता. यथा त्रप्रक्रांतमेव नाम्न पदं प्रपुष्यते तथा दर्शितो दाहरणे पिप्रक्रांतमेव प्रयोक्तुमुचितमिति सिद्धं १ यशइति. कि
रातार्जुनीये ऽप्युपद्याइयमुक्तिः यशो ऽधिगंतुमित्यादीनां अभियोगभाजामित्यनेनान्वयः. अधिगंतुं लब्धुं. मनुष्येषु तत्संगणानां. अतिवर्तितुं. अति

क्रम्यवर्त्तितुमनुष्यदुर्लभमुत्कर्षप्राप्तुमितियावत् निरुत्सुकानां· औत्सुक्यरहितानां· अभियोगभाजां उद्योगवतां· अंकं· उत्संगं· अत्रतत्सप्रयोगा
त्तेमुनप्रत्ययप्रक्रमभंगः २ तद्इति· कुमारसंभवेचपद्यमिदं· तेमरीच्याद्योमुनयः हिमालयं आमंत्र्य आपृष्ट्वा पुनः शूलिनं महादेवं प्रेक्ष्य अस्मेशूलिने सिद्ध
मर्थं गौरीविवाहप्रयोजनं रूपंप्रयोजनं निवेद्य कथयित्वा तेनशूलिनाविसृष्टा आ— खः खमेवाकाशं उद्ययुः उत्पेतुरित्यर्थः अत्रेष्टः प्रक्रमभंगः ३ महीभृत
इति· इदमपितत्रत्यमेवपद्यं· पुत्रवतोपिमहीभृतो हिमाचलस्यदृष्टिः तस्मिन्गौरीरूपे अपत्ये तृप्तिंदिदृक्षापूर्त्तिं न जगाम न प्रापेत्यर्थः अत्र दृष्टांतसा
हाय्यं तेसादिविधियतः अनंतपुष्पस्यमधोर्वसंतस्य संबंधिनी द्विरेफाणां भ्रमराणां मालापंक्तिः चूते आम्रे सविशेषः सातिशयः संग आसक्तिर्यस्याः तथाभूता
भवतीतिशेषः अत्र द्विरेफमालासादृश्यातिशयाद्दृष्टांतदृष्टिर्वेनाध्यवसिताबोध्या· अत्रपुष्पसामान्यसत्तायांतद्विशेषादरदृष्टांतेन दार्ष्टांतिकेपि अपत्यस
सामान्यसत्ताभिधानार्थमपत्यवतइत्येववक्तुमुचितं नतु विशेषतः पुत्रवतइति· दृष्टांतवैषम्यापत्तेः अतः प्रक्रमभंगः पर्यायत्वेएकधर्मिवाचकतया
गौरीं न तु मुख्यमितिबोध्यं एतेनप्रत्रेस्तत्रापि कन्यापामधिकाप्रीतिरितिविवक्षणान्नदोषइतिसमाधानं निरस्तमितिष्ठ तं पद्यावितेन ४ विपदइति· किरा
तार्जुनीये द्रौपद्याउक्तिः अविक्रमं· पराक्रमरहितं· आयदाउपेतं पुरुषं जनं आपत्तिः न रकालशुद्धिः रहयति· त्यजति· निरापते रापत्तिरहितस्य जनस्यल
घुतानीचतानिपतंता· अगरीयान्गौरवहीनोजनः श्रियो लक्ष्म्याः पदमास्पदं न भवतीतिशेषः नृपेतियुधिष्ठिरसंबोधनं· अत्र आपदित्युपसर्गप्रक्रम
भंगः अगरीयानितिपर्यायस्येति पकाविदिति· पार्थिवानां राज्ञा प्रस्थाने यात्रायां पुरोऽग्रे माविउत्पद्यमानं अशिवं अमंगलं नार्यः स्त्रियइत्यनेन
प्रकारेणाशशंसुः सूचितवत्यः कथमित्याकांक्षायामाह काचिदित्यादि· काचित्नारी रजोभिः कीर्णा आसारज स्थला सतीदिवमंतरिक्षमनुविदधोत्र

तुचकारं तस्या अपि रंजो भीरेणभिर्व्याप्तत्वात्· पतिवियोगदुःखेन मूर्छितनाद्वैरणिभिः कीर्णत्वमर्थ इति केचित्· कीदृशीमंदावक्रेंदोर्मुखं चंद्रस्य लक्ष्मीः
शोभा यस्यास्तथाभूता· ज्ञोऽपि मंदवक्रसदृशा चंद्रशोभा बोध्या· काश्चिन्नार्यः अश्रीकाः शोभाहीनाः दिश इव अंतर्दाहं दधिरे· दिग्दाहस्याप्यमंगलसू
चकत्वात्· कीदृश्यः उद्भ्रांतसत्वं चिंतं यासां तथाभूताः दिक्पक्षे उद्भ्रांतानि सत्वानि प्राणिनो यासु तथाभूता इत्यर्थः सत्वं गुणे पिशाचादौ बले द्रव्यस्व
भावयोः· आत्मत्वे व्यवसायेच चित्ते प्राणिषु जंतुष्विति विश्वः तथाऽन्यानार्यः प्रतिपदं वासाइव अश्रु भ्रमरीं चक्रुः· एवमपरानार्यः भूमिवत्कंपमा
ना अशिवं शब्दं सुरिति संबंधः वासाभ्रमरयो भूकंपयोरशुभसूचकत्वं प्रसिद्धं· अत्र काचिदित्येकवचनबहुवचनक्रमादयो न दोषः· एवं कंपमाना इत्यारभ्यातव
क्रमभंगो प्यूह्यः द्रागाहंतामिति· शाकुंतले आश्रमे शकुंतलादर्शनान्निर्वृत्तमृगयाभिलाषस्य राज्ञो दुःष्यंतस्यैवेनापतिं प्रतीयमुक्तिः तत्रोपक्रमे अ
घ तावदिति श्लोकशेषः सर्वाकान्वयीबोध्यः महिषाः शृंगैर्मुहुर्बारंबारं ताडितं उच्छालितं निपानसलिलं कूपसमीपजलाशयस्थं वा घजलंगा
हंतामालोडयंतु· आसायगमेन प्रकृतिस्थाछंद्यातु· सेयंमहिषजातिस्फूर्त्या· एवमग्निमयोऽपि जातिकथनमुन्नेयं· छायायांबद्धकं दं वकं समूहो ये
न तत् मृगकुलं रोमंथं उद्गिलितकवलचर्वणं अभ्यस्यतु· आसांसलापनपरं तयाऽस्मो न्यवान्नीनभिज्ञंविस्मृत शेमंथं चाधुना तदयगमे सति संभू
पशिक्षाक्रमेण रोमंथाभ्यासं करोत्वित्यर्थः कदंबानां वकुलत्वात्कुलस्याम पदार्थत्वोपपत्तिः· एवं वराहयूथैः सूकरश्रेष्ठैः विस्रब्धं विश्वासयुक्तं यथा
स्यात्तथा पल्वलेऽल्पसरसि· मुस्तायाः प्रसिद्धौषधीविशेषस्य क्षतिः त्वनंतं क्रियतां· तथा इदं नानाविधदानवसेनाविनाशक अस्मद्बुत्रस्य शिथि
लोऽस्माबंधो यस्य तथाभूतं सहितिग्यामंलभतां· यद्वा अस्मादिति पंचमी वहुवचनांतं पृथक्पदं· अस्मत्सकाशाद्धितं भवत्वित्यर्थः· अत्रगाहंतामि

तिकर्तितिः प्रक्रमात क्रियतामित्यत्र तद्गुणः ७ अकलितेति धनुर्भंगकुपिते भार्गवे ऽभ्यागते श्रीरामचंद्रस्योक्तिरियं मुनौ भार्गवे रोषाद् अभिगच्छ
ति अभ्यागते सति यागिनः अर्थान्मम अविनयापानूतना या धनुर्विद्यायाः दर्पस्य प्रमापयोग्या पयुद्भूत्पापकर्मतो च रक्षसां दावेगास्फुरति न मस्य
तपापादपो रूपसंग्रहणाय च स्फुरतीत्यन्वयः चद्भूयेन तुल्यकालतामित्युक्तिः किंभूते मुनौ अकलितो ऽपरिमितस्तपसां तेजसो वीर्यस्य प्रभावस्य
प्रथिमा महिमा यस्य एवंभूते यशोनिधौ प्रतिष्ठिते तेनैतज्ज्यायादुत्कर्षाधिकं अवितथेन यथार्थेन मदेन दर्पेण आध्माते प्रदीप्ते इत्यर्थः अत्र तपसः
प्रथमोद्दिष्टत्वेन तद्रुचितस्य पादोपसंग्रहणस्यापि प्राथम्यमुचितं क्रमश्च देशस्यामायादिति पांचमिकमायादिति प्रक्रमभंगः ८ दूयमिति पूर्वमा
ख्यातं अत्र त्वं शब्दार्थस्यैकशो च्यतायां समुच्चयविवक्षणात् त्वं चेति पाठक्रमोपयुक्तस्तदभावात्वत्ता त्वक्रमत्वं शक्तिरिति यस्य राज्ञः सितकरस्य
दत्तद्रसितं यया स्वेतया कीर्त्या प्रकोपात रत्यं श्रीश्चैव तक्के व प्रयातं प्रकर्षेण आयातं दूरं गतमित्यर्थः अत्र कीर्तेः प्रतीत्वे नाध्यवसानं वोध्यं एवं शक्रादी
नामप्यसत्ताप्यिकात्वेन कीदृगुत्के त्वाकांक्षायामाह शक्तिरित्यादि देनाथ इयं प्रत्यक्षा नित्रिंशः खड्ग एव नित्रिंशः क्रूरस्तज्जया शक्तिः सामर्थ्य पे
व नापिका तव भुजयुगले प्रतिवसतीत्यग्रेतनेनान्वयः असत्वं च क्रूरत्वाद्यापाः क्रूरस्वभावत्वात् निंशतः शरणात्रिंशः स निर्गतो यस्मात्समुदायात्स नि
त्रिंशः पुरुषसमुदायस्तज्जन्मा तु नित्रिंशस्तु पुरुषसमुदाय जा वेश्या पुत्रीति यावदित्यर्थ इति महेशः तथा तव वक्त्रे दोषाकरस्य चंद्रस्य श्रीरेव दोषनिधा
नभूता श्रीर्नापिका प्रतिवसति तथा तव पार्श्वे एषा प्रत्यक्षा महाकुट्टिनी महाछेदिके व व्यभिचारस्य महादूती खड्गयष्टिरेव नायिका प्रतिवसति तथा स
र्वगा सर्वत्र वा सर्वत्र प्रतिहतेव सर्वपुरुषगामिनी वेश्येति यावत् इयं ते आज्ञारूपा नायिका पुरतो विलसति ह्रद्भुतास मद्भयेव जत्या मयाते तव किं प्रयो

६९

69

जनमितीत्यमुक्तेतियोऽयं· अत्रापीत्यंशो चेति क्रमनुचितः ९ रामेतितत्पुंवेशे श्रीरामहृतायास्ताडकायावर्णनमिदं· सन्मथइव रामो रामममन्मथः
सएव रमयतीति रामो मन्मथस्तस्य दुःसहे न हृदये ताडिताया निशाचरी राक्षसी ताडकैव निशामिसारिका नीवितेशो यम एव जीवितेशः प्राणोऽस्यहृना
पकस्तस्य वसतिं जगाम स्मिन्वयः। कीदृशी गंधवद्रुधिररूपं चंदनमेव गंधवद्रक्तचेदंनं तेनोक्षिता सिक्ता· मंधवत्वं च पूतनाभ्रूमस्येव रुधिरस्यापियापक्ष
यादिसाहुः अत्र रूप्यमाणानाम प्रकृतार्थानां प्रकृतवीभत्सरसविरोधिशृंगारव्यंजकत्वाद मतपरार्थत्वं दोषः इति ॰ समासं वाक्यदोषप्रकारणं
इदानीमर्थदोषा उपक्रम्यंते अतिविततेति। विजयति· कीदृक् अतिविततं विस्तृतं यद्गगनं तद्रूपायां सरण्यां मार्गे प्रसारो न गमनागमनेन परिमुक्त
स्त्यक्तो विश्रमानंदो विश्रांतिसुखं ये न तथाभूतः तथा· महता उल्लासितं प्रकाशितं सौरभं यस्य तादृशस्य कमलानामाकरस्य हासस्य हृद्दिकारीत्यर्थः अ
त्रातिविततत्वसरणित्वमहदुल्लासितसौरभत्वानामर्थानामनुपादानेपि प्रकृतार्थस्याक्षतेरपुष्टार्थत्वं ११ सदेति· त्वत्काव्यस्य गभीरचमत्कृतार्थशा
लितयातिस्फुटार्थकत्वाभवि पिदाषाभावं समर्थयितुं कस्यचित्कवेरियमुक्तिः ताः एता घनपरिचया असंतापमताः अर्थाः इमा रकाव्ये महतां कवीनां
रूचयो विवक्षाः स्फुटकाव्य इव महाकाव्ये स्मिन्नयो मम सदृशे महाकाव्ये केन प्रकारेण प्रसादं यांतु गच्छंतु सुव्यक्ता भवंत्वित्यर्थः· कथंभूता रुचयः स्फुरितो
विषयीकृतो मधुरः शृंगारादिरसो याभिस्तथाभूताः तेन नोरसत्वपरिहारः· ताः का इत्यपेक्षायामाह सदेसादि· यासां कविरूचीनां मध्ये यज्ञोचरीभूता अ
मृतनिष्यंदवत्सरसा उदारा माधुर्यगुणावहा मार्गा वैदर्भ्यादिरीतित्रयवती इयं कवित्वरूपा सरस्वती परिमलं चमत्कारं वहतीति प्रकृतोर्थः· अन्यत्त
यासां रूचीनामादित्यप्रभाणां मध्ये वक्रमार्गा त्रिपथगा इयं गंगारूपा सरस्वती नदी परिमलं संबंधं च सन्निजा एतामेघपरिचिताः स्फुरितमधुररसाः स्फु

राम
६९

रितो दृष्टो मधुरो रम्यपदार्थो यामित्तथाभूतानामहतां द्वादशादित्यानां रुचयः प्रभाः केन प्रकारेण प्रसादं स्वच्छकांतित्वं यांतीति । विशेषणाद्रूपमु
क्तार्थः । अमृतस्य जलस्य निःष्यंदेन प्रवाहेण सरसा हृद्यं तितार्थः महेश[illegible] एवंविधाः कविरुचयः केन मदीयकाव्येन प्रसादं यांतीति स्वस्य जाड्यका
व्यकरणासामर्थ्योद्भावनाकस्यचिद्विपमित्याह । ननु कथमितरकाव्यवत्सरस्वत्याभवंतिसादिवृत्तिसंदरितो विप्रभं विरुद्धम् । सरस्वती सरिद्वेदे
त्री वाग्देवतयोरपि स्त्री इले चायं गाथ्यां चेति विश्वकोशान्नदीसामान्यवचनोपि सरस्वतीशब्दः । अर्थं चार्थो दुरूहत्वात्स्पष्टः १२ जगतीति । येऽन्येन वेंदुकला
दयो भावाः पदार्था जगति मनो मनोमृद्ग्रंति हर्षयंति अर्थाद्रसिकांस्ते ते संत्येव । एवकारेण स्वस्य महोत्सवहेतवो न भवंतीत्यनादरः प्रकाश्यते । कीदृशाः
जपिनः उत्कर्षशालिनः । तथापरुक्तस्यैव मधुरारमणीयाः तवनार्हिं किं महोत्सवहेतुस्तत्राह मम त्विति । मम तु जन्मनि सएवैको महोत्सवो यदियं मालती वि
लोचनयोश्चंद्रिका रूपालोकेन नयनविषयं याता नयनगोचरतां प्राप्तेत्यर्थः । अत्र पूर्वमसारतयोक्तया श्चंद्रिकाया मालत्यामारोपो व्याहतः १३ हृतमिति । व्याख्या
तमेतत् । अत्रार्जुनार्जुनेति संबोधनाद्योर्मवद्विरिस्तुत्वात्तेषामिति परामर्शादर्जुनस्यापि प्राप्तेः किरातिपदार्थः पुनरुक्तः । अत्र केचित्क्रुद्धोक्तित्वेन परिहारमा
हुः अस्येति । वेणीसंवरणारणवाक्यस्यामस्वत्थामप्रयुक्तिः अरुज्ज्वालाभिरवलीढं व्याप्तं प्रतिबलं शत्रुसैन्यमेव जलधिस्तस्यांतर्मध्ये और्वायमाणो वडवानलतुल्यो
सर्वधन्वीश्वराणां सकलधनुर्धरश्रेष्ठानां गुरौ अस्मिन्प्रसिद्धशौर्ये ममपितरि द्रोणे सेनानाथे सेनापतौ स्थिते सति हे कर्ण संभ्रमेण भयेनालं । हे कृप त्वं सम
रं व्रज गच्छ । हे हार्दिक्य त्वं त्वर्ममर्शकां त्रासं मुंच । चापमेव द्वितीयं यस्य चापैकसहायेन ताते द्रोणे रणधुरं वहति सति भयस्य कोऽवकाशोऽवसरः इत्यर्थः । अत्र च
तुर्थपादार्थः पुनरुक्तः १४ भूपालेति । कस्यचिदर्थिन उक्तिः । हे भूपाल भुरत्नभूतश्रेष्ठ तिगीतं दैन्यं यस्मादर्थादर्थिनां तथाविधे प्रकृष्टदाने प्रथितः ख्यात उत्स

७०

70

वोपस्य तथाभूतराजन् मेतुरंगं अश्वं विश्राणपदेहि· मदेनालसं मातंगं वा विश्राणयेत्यनुषंगः। तस्य नातिश्रेष्ठेयास्य मरः। अत्र तुरंगमातंगं वेति
क्रमो लोकविरुद्धः १५ प्रदीपेकावारितुलोतीति· कारयित्वाक्षोण्यामपद्धौ निमज्य भुक्त्वा च· नक्षत्रे तिथिवारेश्मो तिषिकं प्रष्टुं चलितइति संस्कृतं
अयं क्रमो धर्मशास्त्रविरुद्धः स्वपितीति· नवोढां प्रति रंतुमिच्छोः कस्यचिदुक्तिरियं· अयं जनः सर्वो रूपो निकटे स्थितो जनः यावत् त्वयि तिस्वापं
करोति तावदहं स्वपिमि लक्ष्मणापारमामीत्यर्थः तेन वक्रिमयेतिहीयते· तन्नस्मात् कुर्यरंजानुमपि सांप्रतमुचितं पथ्यास्यात्तथा आहरश्चयेत्यर्थः त
था कुंचितं संकुचितं तुरूत्वरितं शीघ्रमुरं च प्रसारयेति· अपीतिपाठे समवोधनं· अयमर्थोग्राम्यः १६ गृहीतमिति· द्वारोहतेरोकाविष्टस्याश्वत्थाम्न
शस्त्रं संबंध्यप्रमुक्तिः हे शस्त्र येन मपित्रा नोचितमपि ब्रह्मराजा त्यनुचितमपि त्वदुपदरूपशशोः परिभव भयात् गृहीतमामीः यस्य प्रभावात्तव
कश्चिन्न विषयो नाभूत अपितु सर्वो यांद्रादिस्त्वस्मात विषयोभूत· तेन मत्पित्रा सुतस्य मम मिथ्या मरणाश्रवणाज्जातो शोकानलं परित्यक्तमसि नतु भया
त्यक्तं अहमपि त्वां विमोक्ष्ये यतः अंतोभवते स्वस्तीत्यर्थः· यतो यत्र भवते स्वस्ति तत्र विमोक्ष्य इति वा· अत्र स्वस्य मृत्युस्त्रस्नागेहे तुर्नोपात्त इति निर्हेतुत्वं १७ इदं
तरति· कमलानामाननं कोमयं यस्मात् तदृशं वदनं यस्यास्तथाभूते हे सुंदरि· अनेन वदनस्य चंद्रत्वं सूचितं· एतस्मिन्नकारस्थिते हेमन्तः कुत्र्वं ककराममिति
मयतस्त्वियं धन्येश्वाप्यसिद्दं तेकेन भ्रांतप्रतारकेणाक्रं कथयेतिसंबंधः तर्हि किमेतदित्याकांक्षायामाह· इदमिति· इदं तत्प्रसिद्धं दुःसाधानामा
क्रमणां वशीकारो यस्मात्तथाभूतं परमास्त्रं चक्रं स्मृतिभुवाकामेन यीस्मात तव करकमले विनिहितमित्यर्थः अत्र च कस्य कामायुधत्वमप्रसिद्धं १८
सुस्मितेति· राजानं प्रति कवेरुक्तिः हे राजन् सुदृशि शोभन नयनानां कर्णाचित्रे पिकायो कदाचन कस्मिंश्चिद्वसरे कोमुदी महसि चंद्रिको द्योते

एम·
७०

स्वैरं वांछया हिंसेन स्वच्छंदं यांत्सोस्मि सारं कुर्वत्या मित्यर्थः अत एव कुसुमिता अतिश्येन वसनालंकारा वस्त्रसहिता अलंकारा यस्यास्तथाभूता
यां सस्यां विधुरश्चन्द्रः अस्तं गतो भूज· तद्वत् तदनंतरं केनापि भवतः कीर्तिर्गीयते· गीता· येन कीर्तिगानेन तज्ज्योत्स्ना प्रकाशात् तस्या अभिसारिकाया मुक्ता
आशंका स्वच्छेता भवतो लोके कदृश्यत्वभयं यया तथाभूता सती पतिगृहमगात गतवती अत एव कस्मिन्देशे अवसरे वा शुभप्रदो नासि न भवस्य
पि तु सर्वत्रेत्यर्थः अत्र कीर्तिज्योत्स्नावत् प्रकाशं न कविसंप्रदायप्रसिद्धमित्यसदोषः ॥१९॥ उपेति· अशोककलिकादर्शनमूर्छितस्य गृहमागच्छतः पथि
कस्य तेनेव यथा जिगमिषून्माम्नातीयमुक्तिः भो अध्वगाः गोदावर्या उपपरिसरं पर्यंतभूसमीपे सरणीं मार्गं परित्यजत भवद्भिस्त्वावत अपरो मा अवे
क्ष्यतां दृश्यतां· तावदिति यावदशोकोंकुरितः॥ कुत इत्यत आह हि यस्मादिह सख्यो कया पिहताशया वनितया रक्ताशोकः चरणानलिन स्यचरणाकस्सल
स्य मासेनाघातेन उदंचं तउद्गच्छं तो न वांकुरा एव कंचुकं सर्वांगमपि तया यस्य तथाभूतो विहितः कृतः· हताशयेति शाविघातकत्वया रोषोक्तिः· अ
त्र पादाघातेनाशोकस्य पुष्पोद्गम एव कविसमयो न त्वंकुरोद्गम इति नेतक विप्रसिद्धरूढाहरणं २० सदेति· निगदत्याह्यातं· अत्र निमित्तं विना राज्ञो स्ना
नं धर्मशास्त्रविरुद्धं २१ अनन्येति· यस्य वाक्यो भुजयोरनन्यसदृशं अनुपमं बलं समीक्ष्यते तस्य स्वाप्रसिद्धाषाड्गुण्यानुसृतिः संधिविग्रहयानासनद्वैधसंश्र
यात्मक षड्गुणानुसरणं निःप्रयोजनेति सत्यमित्यन्वयः षाड्गुण्यमिति स्वार्थे ष्यञ्· अपमर्थेनीतिशास्त्रविरुद्धः २२ विधायेति· अगतात्के पूर्वं प्रसिद्धमंग
दं दूरे विधाय अनंगांगदरूपां कांते नकृतां करजानां नखानामुल्लेखानां क्षतानां मालिकां पंक्तिं विभारधनवतीत्यन्वयः· अनंगांगदमिति· अनंगायांगप्रद
मेव अनंगसंबंधि वा कुंकुमभूषणमिति हिष्टेर्थः अनंगांगणामिति वा पाठः· तत्रापि केयूरविशेषणत्वमिति केचित् अत्र केयूरस्थाने नखदातंकामशास्त्र

७१

विरुद्धं न स्वक्षतस्य स्यानानिकक्षौ वक्षस्तथा मलः। पार्श्वे जघनमूरू च स्तनगंडुललाटिका इति यात्स्यापनोक्तस्थाननिर्जितत्वात्। २३ अष्टांगेति। यमनिय
मासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाण्यष्टावंगानि यस्य तथाभूतस्य योगस्य परिशीलनेनाभ्यासेन पक्कीलनेन श्लिष्टीकरणं तेन दु
राधा याद्दुःप्रापायाः सिद्धेर्मुक्तिरूपायाः सविधं निकटस्थं पुरुषमात्रविश्रांतमनोवृत्तिरूपमसंप्रज्ञातयोगं विदूरे विदधत् तत्र मनपेक्ष्ये च अभिमतां का
र्यसमर्थां विवेकख्यातिं प्रकृतिपुरुषयोर्भेदज्ञानरूपां आसादयन् प्राप्नुवन् यम्समाधिधनानां योगिनां मौलिमणिः श्रेष्ठः कश्चिदधुना विमुक्त इत्यन्वयः दुः
साधसिद्धयोगिमाधार्यात्तत्सान्निध्यं वर्जयन्नित्यर्थ इति केचित्। अत्र विवेकख्यात्यनंतरं संप्रज्ञातासंप्रज्ञातयोगावनपेक्ष्य मुक्तिकथनं योगशास्त्रवि
रुद्धम्। वितर्कविचाराद्यनुसारी संप्रज्ञातयोगः २४ प्राप्ताइति। शांतस्य भर्तुर्हरेरियं मुक्तिः सकलकामदुघा सकलकामप्रदायिन्यः श्रियः संपदः प्राप्तास्तत
स्तेन किं कः पुरुषार्थः मुक्तिं विना कृतकृत्यतायाः अभावादिति भावः। एवमग्रेपि। विद्विषतां शत्रूणां शिरस्सु पदं ददते तेषामाक्रमणं कृतमिति यावत्।
प्रणयिनो मित्राद्याः विभवैः समृद्धिभिः तनुभृतां शरीरिणां तनुभिः शरीरैः कल्पं व्याप्य स्थितं जीवितं ततो पि किमित्यर्थः। अत्र ततः। किमिति पुनः पुन
रुक्त्या अनवीकृतत्वं २५ यदीति। सतां अविषादिता विषादशून्यता प्रकृतिरेव नाश्चर्यकरी। अत्रोपमानभूतं वाक्यार्थत्रयमुपन्यस्यति यदीत्यादिना। एवं
च यथा अनलो वह्निर्यदि दहति अत्रार्थे किमद्भुतमाश्चर्यं न किमपीत्यर्थः। यदि चाद्रिषु पर्वतेषु गौरवमस्तीति शेषः ततः। किं तदपि नाद्भुतमित्यर्थः।
महोदधेरंबुसदैवलत्वं लवणाक्षारं अत्र तदपि नाद्भुतं। तथा सतामविषादिता प्रकृतिरेवेत्यर्थपर्यवसानं बोध्यं। अत्रैक एवाश्चर्याभावो भंगिभेदेनोक्त इति न
वीकृतत्वस्यात्र दोषः २६ यत्रेति। तस्य मरोणा स्थितां मणीः आभासेन एष कांतिमात्रेण अमरणाय एव मणित्वेन रूल्पितायेऽश्मानः याषाणास्तेषुम

७।
सत ४

राम·
७१

ध्येयत्वं त्वं पापारात्वमेवो चिंतितं तु मणित्वं · चिंतामणेः साधारणमणिगणानां गणनमनुचितमित्यर्थः तस्य कस्येत्यपेक्षायामाह यत्रेति ·
यत्र चिंतितं तु मणित्वं · चिंतामणेः साधारणमणिगणनानां गणनमनुचितमित्यर्थः तस्य कस्येत्यपेक्षायामाह · यत्रेति · यत्र चिंतामणौ सति
एतस्य सकलं विधेर्निर्माणं सृष्टिः न उल्लिखिता निर्दिष्टा आख्यानामपरूपता प्राप्नुतं भवतीति शेषः प्रयोजनाभावेन नामाग्रहणात् · अनुल्लिखि
तार्थमिति पाठे अनुल्लिखितोऽनिर्दिष्टः अर्थः प्रयोजनं यस्येति तदप्रयोजनकमित्यर्थः · अथवा यत्र यदुद्दिष्टयकं विधेर्निर्माणं अनुल्लिखितार्थं अ
निर्वचनीयप्रयोजनमित्यर्थः तथा यत्र मणौ उत्कर्षस्य प्रतियोगिनोऽवधेः कस्यचित्कल्पनमपि परान्यकाष्ठा एवावतायाः कोटिः काष्ठा · सर्वोत्कृ
ष्टतया यस्मिन् किंचिन्निरूपितोत्कर्षकथनम् अपकर्षहेतुत्वात् · उत्कर्षप्रतियोगिनः प्रतिसंबंधिनः सदृशस्येत्यर्थः कल्पनं कथनं परान्यकाष्ठास्य कोटिः
निरूपमत्वहानेरिति केचित् तथा यस्य मणेः संपदः प्राणभृतां प्राणिनां मनोरथगतीरुल्लंघ्यातिक्रम्यातनाः मनोरथस्याप्यगोचरा इत्यर्थः
अत्रामोक्षो आभासमात्रेणेति वाच्यं अन्यथा निंदनीयानां मणीनां गुणांतरस्यावच्छेदाप्रतीतेः २७ वक्तुं भोजमिति · मृगयायां पिपासुं राजानं प्रति
कवेरुक्तिः हे अवनिपते तेन तव अंतःस्वच्छे सत्वगुणप्रधाने एवं स्वच्छे निर्मले मानसेऽन्तःकरण एव मानसे सरसि अंबुपानस्याभिलाषः कथं भव
तीति शेषः जलाधारतया तव पिपासानुचितेति भावः · अनेन विस्मातिशयं प्रतिपादयेत् मा ह वक्तेत्यादि · तेऽइत्यग्रेतनमिहापि संबध्यते · तव वक्त्रा
भोजं सरस्वती भारत्येव नदीविशेषे वसरधिवसति · तेन वाधरः शोणोरक्त एव शोणो नद एव · ते दक्षिणो दक्षिणादिवस्थ एव वामेतरो बाहुः मुद्रया
राजचिह्नभूतया सहित एव समुद्रो जलधिः कीदृशः काकुत्स्थस्य रामस्य वीर्यस्यातिकरोपद्रुतः समर्थः तद्बाहुसादृश्यात् · एवं समुद्रोपि बंधनो तथा

७२
72

भूतः एताबाहिम्यः सेना एवं नयः भवतः पार्श्वस्थाणामपि नैव मुंचंति सजंजीत्यर्थः अत्र शोणा एवेत्यवधारणमनुचितं अम्बुजलाशयमात्रेऽपि
यासां नो चितातिशयप्रतिकूलत्वात् २८ श्यामामिति॥ बद्धशालभंजिकाख्यनाटिकायां मृगांकावलीविशेषणानुरक्तस्य शत्रो विद्याधरमल्लदेवस्ये
यमुक्तिः भो इत्याकाशे संबोधनं भो जनाः मांईयत्नैर्मशीनां कूर्चकैस्तूलिकाभिः चूर्णोऽरिति महेशाः श्यामां रात्रिं चंद्रिकाधवलां श्यामलिमानं श्या
मलं तां आनयत प्रापयतेत्यर्थः अथेति विकल्पे मंत्रमथवा तंत्रं वेद्यकादिशास्त्रं प्रयुज्य तदुक्तौषधप्रयोगं कृत्वेत्यर्थः तंत्रमौषधमित्यन्ये
शेवनानाप्रसत्वानो श्रियं शोभां हरत नाशयत रुचमिति पाठे दीप्तिं चंद्रचविलाघवकृद्केहृतानि धापक्षणात्तरणाशाश्च रायत यैर्नेवंविधकरोत न
अहं तस्या मृगांकावल्या वक्त्रमुद्रयावदनरूपचिह्नेनाकिंता दशादिशो द्रष्टुं क्षमे समर्थो भवामि भावनोपनीतं तन्मुखं दशसु दिक्षु पश्यत श्चंद्रिका
दिमिरुद्दीपकतया संतापकैः क्रियमाणां प्रतिबंधमुक्तां रीत्या तद्यनयनं नाथ हरतेत्यर्थः अत्र ज्योत्स्नीरूपरात्रिविशेषस्याविवक्षितत्वाद्विशेषयत
एव ज्योत्स्नीमित्यभिधानमनुचितं अन्यथा विशेषणस्य प्रतीतौ विलंबापत्तेः यत्तु श्यामामायाः श्यामलीकरणं व्यर्थमिति दूषकनीवीजमित्याकृत्त
दयुक्तं पदस्य निरात्रिरणमलिमातमिस्यस्यादुष्टत्वापत्तेरिति २९ कल्लोलेति देमकराणामालयस्तनुद्रकल्लोलेस्तरैर्भवैल्लितानां वालितानां
दृषदां पाषाणानां परुषैः कठोरैः प्रहारैरमूनि स्वाश्रितानि रत्नानि मा अव मंस्थाः माऽवज्ञासीः कुत इत्यपेक्षायामाह किमिति भवतः कौस्तुभाख्येन
रत्नेन पुरुषोत्तमः श्रीकृष्णो विपन्नार्थः प्रसारितः करो येन तथाभूतः किं नाम न विहितः अपि तु विहित एवेत्यर्थः तथा च केन रत्नेनैवंविधोत्कर्षला
भादन्येषामपि रत्नानामवमाननं नोचितमित्यर्थो विवक्षितः स च कौस्तुभे नेति विशेषणेनाभिधानेन निर्वहति कौस्तुभस्योपकारकत्वेप्यन्यरत्न

राम. ७२

सामान्यावमाननन्निषेधायोगात्· कोस्त्कमस्यास्त्वसामान्यांतर्गतत्वेनाप्रतीतेः एकेन किमिति पाठे तु तथा प्रतीतेर्न दोषः ३० अर्थित्वइति· सीताप्रा
प्तो निशास्य रावणाद्भूतस्य शोकलस्यैवमुक्तिः अर्थित्वमत्र प्रार्थ्याचकत्वप्रकारेक्तेपि प्रभोः एवमस्य फलप्राप्तिः सीतालाभो नास्ति· प्रस्तुत
विपरीतं कुर्वन्स्तु केन ताडकादिवधेन द्रोहकारी विहृ इंचरितं पञ्चादिरक्षरूपं यस्य तथाभूतो दाशरथिस्तया प्रार्थ्यमानया कन्यया सीतया युक्तः संयुक्तः
दाशरथिरिति पितृसंबंधोत्कीर्तनेन स्वतः स्यात्स्वभावादपकर्षसूचनं स्वप्रार्थितं स्वयं न लब्धं किं तु शत्रुणेति वैपरीत्यं· परस्य शत्रोरुत्कर्ष आत्मनस्व
मानयशसोर्विध्वंसनं भ्रंशं स्त्रीरत्नं च सीतालक्षणं जगतां पतिर्दशमुखो देवः कथं मृष्यते क्षमते न कथंचिदित्यर्थः अत्र स्त्रीरत्नेत्र मर्म्यायोगेन स्त्रीरत्नमुपे
क्षितुमित्यर्थसाकांक्षम्· ३१ आज्ञेति· वीरचरिते संस्येव बहवो गुणास्तथापि वलवानेको दोषस्तानयवदतीत्युपक्रम्य रावणादूतं प्रति जनकपुरोहि
तस्य शतानंदस्यैवमुक्तिः· यस्य रावणस्याज्ञा शक्रस्येंद्रस्यापि वामशोः शरणापिनी शिरोधार्येतिपावनत्· शरणापिनीत्वेन रूपणाद्रूपस्पोरवि
च्छेदसूचनं· शास्त्राण्येव नवं चक्षुः शास्त्रदृष्टेर्वाचरणात्· बहुवचनैकवचनाभ्यां सर्वशास्त्रविषयकज्ञानसूचनं- नवत्वेनाभ्रांतत्वं सूच्यते· भूत
पतौ सकलप्राणिनामीश्वरे पिनाकिनि हरे भक्तिः लोकेतिप्रसिद्धा दिव्या पुरी पदं निवासस्थानं दुहिणस्य ब्रह्मणोन्वये कुले चोत्पत्तिर्जन्म तत्तस्माद
हो आश्चर्ये ईदृग्गुणगणयुक्तो वरो न लभ्यते दुर्लभ इत्यर्थः एवं रावणः रावयति पीडाजननेनाक्रंदयति लोकानिति तथाभूतस्तेनैतस्मात्तदाक्तनुपु
नः सर्वत्र जने सर्वे पूर्वोक्ता गुणा न कापि किं तु रावण एव सर्वगुणशालितयोत्कृष्टः स्यात् जगदाक्रंदनदायित्वेन तु वलवता दोषेणायमनुपादेय
इति भावः· अत्रस्याश्चेदेष न रावण इत्यत्रैव कार्यसमाप्तिः हृ चिन्ताकेनुपुनरित्यादि विस्तारेणानुमध्यप्रवेशेन स्याश्चेदेष न रावण इत्यर्थो ऽ लक्षि

७३
73

तस्मा यतया त्तच मत्ता द्विश्रांतिस्थानतां लभत इत्यनुभवैकसाक्षिकमिति: केचित्तु न केवलं रावणस्यैव दोषमिश्रिता गुणा अपितु सर्वेषामेवे
त्याह कत्तु पुनरिति · कत्तु पुनः सर्वत्र तनेस्त वैगुण्यं एव अपितु कश्चिद्दोषोपीत्यर्थः एवं च समाधानपर्यवसानादस्यानेर्थसमापनमित्याहुः ३२
श्रुतेनेति श्रुतेन शास्त्रश्रवणेन बुद्धिरलंकृता इत्याद्यन्वयः · व्यसनेन द्यूतादिना · निम्नगा · नदी · धृतिः धैर्यं · समाधिना योगेन · धर्मचिंतया वा · नयेन ·
नीत्या · शेषं स्पष्टार्थम् · अत्र श्रुतादिषु त्रिषु तथा सहचरेषु निकृष्टतया तद्विजयोर्व्यसनमूर्खतयोः पादानमनुचितं प्रायपाठ पायेन तयोरप्युपा
देयत्वप्रतीतिप्रसंगादिति ३३ लग्नमितिव्याख्यातं पूर्वं · अत्र विदितं तेस्ति स्यनेन लक्ष्मीस्ततोऽपसरतीति विरुद्धार्थप्रकाशः ।। प्रयलेति · वेगीसंव
रणो द्रोणवधकुपितस्य शत्रून्प्रति प्रतिकर्त्तुमिच्छोरश्वत्थाम्नो दुर्योधनं प्रत्याश्वासनोक्तिरियं · हे राजन् अद्य त्वं निशां व्याप्य शेषे निद्रां नाकृतयात
दुपनायक · विरहिप्राणानां दमनसंत्रासक · सरोहंसस्य सरःश्रेष्ठस्य उत्तंसभूषण · प्रचलानिमंदमारुतचंचला दलानि यस्य तथाभूतेत्यर्थः निर्लो
भेन्दयनो हंस इति विग्रहः · अत्र विरहिणः स्वस्य मोहस्य थनविधो विरहिप्राणदमनेत्यनुवादो विरुद्धत्वादपक्रमः ३६ हंतुमिति · हननं · हिंसा · सरतो विचित
प्रहारस्य · तत्र व्यलं अनम्रतादृढत्वं च · विवरं पारुष्यरणं स्त्रीवराङ्गं च · यातोऽपकर्षः · धातुनुयातजनितः संकोचश्च · उन्नतिरुत्कर्षो धातुप्रत्यागमाद्दृढता
च · अत्र स्पष्टमश्लीलत्वं ।। ३७ अस्या इति · स्पष्टं · अत्रावतंसपदेनैव कर्णाभरणोक्तावपि कर्णपदस्य कार्णेत्येति व्यंजकतया न पुनरुक्तत्वादिदो
षः ३८ अपूर्वेति अपूर्वो लोकोत्तरो मधुरो हृद्यो यश्चामोदो गंधपुष्पादि परिमलस्तेनामोदितादिशो येस्तथाभूताः महोर्मयः स्वराः शिरसि शेखरस्रग्मालिनः।
किरीटशोभिनः पुरुषा आपपुरित्यन्वयः मदिरामोदेति पाठेपि तया मदिरया आमोदः अत्रापि शिरः शेखरे इति पूर्ववत ३९ विद्रोणेति · हे राजन्

राम·
७३

संमुखांतरे रणमध्येन वदोष्माहृतेन विस्फुरितमित्यन्वयः कीदृशो· विदीर्णौर्विक्षते रभिमुखैरशातिभिः शत्रुभिः करालेयाम्भे भीषणो वी· किंभूतेन दो
ष्मा· धनुर्ज्यायाः किणः प्रहृष्टव्रणचिह्नं तदेव चिह्नं यस्य तथाभूतेनेत्यर्थः· अत्र धनुर्गुणाकृष्टत्वप्रतीतये धनुःपदं· साचाकिणस्य प्रहारकृतत्वप्रतिपत्तये·
४० इत्यावंधेति· यस्य कार्तवीर्यार्जुनस्य कारागृहे वंधनागारे निर्जितेंद्रेणापि लंकेश्वरेण रावणेनाऽसादावसादप्रयतं स्थितमिति संबंधः· कीदृशो नय
यामीर्घ्यायो वंधस्तेन निस्पंदो निश्चेष्टो भुजो यस्य तथाभूतेन· तथा विशेषतो निःश्वसंतीवक्रपरंपरा यस्य तथाभूतेनेत्यर्थः· अत्र पूर्वोक्तप्रयोजनाभा
वाद्धनुः पदं गुणप्रदाने· ४१ शारोध्वरेति· स्तनद्वयं कर्णेप्राप्तोऽश्वरस्यदर्पितस्य थरिष्ठंगेणालिंगनेन याः विभ्रमस्य विलासस्य प्रतिपत्तये तामिस्त्यलक्षितं तल
सतानस्फुरतामुक्ताहारेणाहसतीवेत्यन्वयः मुक्ता हार एव हाराइत्यर्थः हारे मुक्तः वलावितिविश्वः· अत्रापिरलोत्तरामिश्रत्ववोधनाय मुक्तापदप्रयोगः
४२ सौंदर्येति· हे सख्ये सा वनिता कान्पुरुषान्नाकर्षति न वशीकरोति केव· षट्पदान्पुष्पमालेव· साका· यस्याः सौंदर्यपतनताद्रूपं चास्तीति शेषः तेते
अनुभूता नानाविधा विभ्रमा विलासाः संतीत्यर्थः अत्र निरूपपदान्मालाशब्दादेव पुष्पस्रक्प्रतीतेः पुष्पपदमुत्कृष्टपुष्पत्वे संक्रमितवाच्यमस्ती
ति संबंधः· सामीप्याद्वर्तमानत्वेन निर्दिष्टाः कीदृशाः स्तनाभिः प्रयत्नेन परिशोषिताः· तथा निद्रास्पेतियथैवं प्रतिनोधनीय इत्यर्थः अथ भुवनं अकेशवं
श्रीकृष्णरहितं पांडवैश्चरहितं निर्गताः सोमकाः पांचाला यस्मात्तथाभूतं च यंतः करमीतिशेषः· अथ द्रौः शालिनां वा हशालिनां सृत्रियाणामियं र
णकथा संग्रामवार्ता परिसमाप्यते इतरतस्तं ग्रामः अथ भुवः पृथिव्याः भारः अयेतु· अपगच्छतु· कीदृशः रिपुरूपेण काननेन वनेनातिगुरुर्गरीयान् नित्य
र्थः कालांतरकर्तव्यत्वसंभावनायाः सर्वथैव निरासाय पादमध्ये तुक्तिः अत्र तथा निद्रास्पस्विपयोवं परिबोध्यस इतिप्रतिबोधनएव विधेयत्ववि

श्रांतिर्युक्तानशेषेइतिशापनइत्यपुक्तविधित्वं॰ ३४ वातेति॰ विषधरैः सर्पैर्वाताहारास्तथा जगद्दाश्वास्यएते॰ तिधर्मिष्ठास्तपस्विन इति विश्वासमुक्तं छ
लानिःशेषितं भक्षितं॰ तेपुनर्विषधराः अभ्रसंबंधितोपकल्पिके वतीव्रं त्रयेषां तथाभूतैर्मेघजलबिंदुमात्राहारैरित्यर्थः बर्हिभिर्मयूरैर्यस्ताः तेपिमयू
राः कुरेकठिनस्पर्शं चमूरोस्थिवन्मृगास्यचर्मैव वसनं येषां तथाविधैर्लुब्धकैर्व्याधैः क्षपंनीताइत्येवं दंभस्यइगाश्रयेन धर्माचरणस्य स्फुरितं चेष्टितं विद
त्रपि वाताशनादिव्रतं सर्पाद्यैर्जगदादि भक्षणा यहृतमिति जानन्नपि जाल्मो मूर्खो जनः गुणानीहते दांभिके ष्वितिशेषः ईहते संभावयतीत्यर्थः जाल्मोऽ
समीक्ष्यकारीत्यादित्यमरः॰ अन्येतु॰ दंभस्य स्फुरितं असकलं विदन्नपि जाल्मो जनो गुणानं दंभगुणानीहते चेष्टते॰ अमुमेवार्थमर्थान्तरन्यासेर्द्रढयति
वातेत्यादि॰ अत्रदंभकृतपरहिंसाफलत्वान्नेपि सर्पादीनां आश्वासहेतु वाताहारादिगुणाचेष्टत्वात्कुः अत्रदंभचेष्टापाविधेयत्वेन विवक्षितत्वात्समानस्त्रिःशेषपि
तुं वाताहारः कृतस्तान्यवसितुमभ्रकल्पिकाव्रतं कृतं तान्नरूपं नेतुंचर्मवसनं कृतमित्येवं कुत्कर्मणाभिधातुमुक्तम्॰ केचित्तु वर्मवसनात्रोपकल्पिकाप्रा
नस्यनतोपि च वाताहारस्यतीव्रतरत्वेन कुत्कर्मणोपमासोपुक्त कुलकमेदोतिदुष्कमत्वस्यैवापत्तेरिति १ अरेइति॰ विरहिणां पुरुरवसइयमुक्तिः अरेः
हेसरव॰ नीलोत्पलश्रहंसरवेरसहितो स्पतइंदुवदनाउर्वशीके तिकथयमो हृस्लथपशिथिलीकुर्विति संबंधः॰ कीदृशा॰ रामाणां हृतस्माभरणाश्रलं
काराभूत॰ अनेनपर्ह्विचयाद्वार्तामित्रत्वं धन्यते॰ भमरलानां भ्रमराणांश्रेणयः शारणागृहभ्रतस्मिरकीडायांयाक्रीडातन्छमनः उद्दीपएवमेव करीरं हितादि
घपिबोध्यम्॰ ४३ चरणेति॰ वरणात्रमुपानतात्कृतपरित्राणारहितं भ्यामित्यर्थः अत्रचरणात्रचरणाते॰ तिविशेषणावोधनायपादाभ्यामित्यस्योपादा
नाम्नापुष्टार्थत्वं॰ ४४ चंद्रेति॰ कुमारसंभवेपद्यमिदं॰ लक्ष्मीश्चंद्रं॰ लक्ष्मीश्चंद्रंगतासतीपद्मगुणान्नसोरभादीन्नभुंक्ते नसंश्लिष्टाननभवतीत्यर्थः॥ तत्रोपद्म

स्यासंकुचितत्वात्पद्माश्रिता । दिवा विकसत्कमलाश्रिता सती चांद्रमसी अभिख्यां शोभां न भुंक्त इत्यनुषंगः अत्र चंद्रस्य निष्प्रभत्वं हेतुः उभाभ्युदयं तु प्र
तिपद्यमाप्यम् अत एव लोला चपला लक्ष्मीर्हि संश्रयं चंद्रपद्मौ मयाश्रितौ पीतिमत्राय· न स्यो मयगतगुणशोभाश्रयत्वादिति भावः अत्र हेतोः प्र
सिद्धत्वात्पूर्वार्द्धे निर्हेतुत्वदोषः ४५ मृगेति· मृगचक्षुषं· मृगनेत्रां दीधीङ्· वेवीङ् इति धातुद्वयस्य दृशः गुणवृद्धौ भाजनमनाश्रयः गुणो धैर्यादिः
वृद्धिः समृद्धिः धातुपक्षे गुणाः अदेङ्· गुण इति परिभाषितः वृद्धिरादैजिति परिभाषिता· तयोर्भाजनं· दीधीवेवीटामिति सूत्रेण निषेधात्· तथा क
श्रितं किं अत्यये न निमत्तुल्यः· प्रत्येयस्मिन्न्दैवहतके पुरुषे किं प्रत्यये च संनिहिते सति ते गुणवृद्धी न भवतः । दीधीङिति निषेधात· अत्र वक्तुर्वैयाक
रणत्वात्कष्टत्वगुणः कश्चित् किं प्रत्ययेस्यादिकष्टत्वोदाहरणं· यथा क्विपः सर्वापहारी लोपस्तथा तस्यापीत्यर्थस्य दुरूहत्वात् ॥ हृ· ४७ पदेति· पद
विद्यायां व्याकरणशास्त्रे विशारदं निपुणं त्वामहं पादाद्राक्षं दृष्टवान् तदोपास्वस्यो पाध्यायं गुरुम् अस्मार्थसादृश्यात्तस्य तेन नान् संमर्दं हर्षं च सम्यग
स्याक्षं दृष्टवान्यत्नवानित्यर्थः अत्र वैयाकरणसंबोधनत्वात्गुणत्वं ४८ अंभ इति· अत्र प्रकृततानां कादृर्थे शोभनं यथा स्यात्तथा ... तथा क्रणं तिक्कं क
णानि तत्र आपाणि तद्वद्धूलानि पुंसि ... नि चंचलानि यानि भूषणानि ग्रैवेयांगदादीनि तेषां रवैः शब्दैः अंबरमाकाशं आघोषयंती प्रति ध्वनिमत्कुर्वती·
तथा पूर्वं पीतं पुनःछर्दितं वांतं ... मेव कर्दमः पंकस्तेन घनो व्याप्तो यं प्रांगणं भारतत्र कायस्तत्र घोरं यथा स्यात्तथा उत्तं संतो तत्र ताव्या लोलो वयवो यो
स्तनोन्नयो भारेणाभेरवं भाषणं वपुर्यस्यास्तथा भूताः प्राग्भारेति पाठे प्राग्भारेणा निर्वर्क्षरंसेकर इति कश्चित्· तेन योगा वितिस्तन विशेषणं· अत्र
बीभत्सरसस्यायोग्यत्वात्कष्टत्वगुणः ४९ मातंगा इति· हे मातंगा गत्वस्त्रीतैर्बृंहितैः किमु प्रयोजनमिति शेषः हे जंबुकाः शृगालाः अफले रावं परैः किं·

हेसारंगा मृगास्तथा महिषाः मदं गर्वं किं किमर्थं त्रयः भूपेषु वलवद्दृहितेषु स्थानेषु स्थानेष्वकेन सूराः अपितु सर्वेपीत्यर्थः तथा च मूर्खार्थम
पि नैतदुचितमिति भावः किं तर्हि सार्थकं तत्राह कोपे सदि· कोपस्यारोपेन परिणाया समुद्दाउत्कटा नच्छितास सटाकोटिः केसराग्रं यस्य तथा
भूतस्य भारेः सिंहस्य पुरोग्रे सिंधोरिव ध्वानिनि ध्वनिशालि हुंकृते स्फुरति सति यत्तगर्जितं तत् गर्जितं सोर्थकमित्यर्थः द्वितीयगर्जितपदस्य सा
र्थकत्वविशिष्टलाक्षणिकत्वात्· सकलगर्जितत्वरूपार्थान्तरसंक्रमितवाच्यत्वं तु न युक्तं· गर्जितांतरस्याफलत्वेन पूर्वमनुक्तत्वादिति· अत्र सिंह
रूपवाच्योचितार्थाद्दभिधानेकष्टत्वं गुणः ५० रेकेति· विरहिताः पृथक्त्वेसः किलेयमुक्तिः हेरेकवराशोक स्मे पादनुरक्तामशोकोपस्मात्तथाभू
तत्र अनुरंजनं मङ्गयं तस्मात्कृशोदरी कृतगतेत्यन्वयः· वातवालितानां तदग्रशाखां दृष्ट्वा पुनरागतो दृष्टेतीति· दत्तीमनंतरं सूचयितुमितिशेषः वा
तेनावधूतं कंपितं शिरः मुधैव वृथैव अभिध्येवेति यावत् किंकृतश्चालयसि पवनाधूतस्येव शिरः सः क्रोधाद्वा तथाविकंपितत्वेनोक्तिः· मिथ्यात्वसमर्थयति उ
त्कंठेत्यादिना· तस्याः कृशोदर्याः पादाहतिं पादाघातमंतरेण विनाभवतः अयं दत्तयमानः कुचोदयः कुतः कस्माद्धेतोः स्यादिति समर्थयतिशेषः। कीदृशः
पुष्पोद्गमः· उत्कंठया घटमानानां मिलितानां षट्पदानां पादपसमूकस्तस्य संघट्टेन निविडसंबंधेन दष्टाः खंडिता स्तदाः पत्रालीयस्य तथाभूतदूत्यर्थः
अत्र मिथ्याशिरोधूननेनकोपप्रकाशोकष्टत्वं गुणः ५१ शीर्णेति· मयूरकवेः सूर्यस्तुतिरियं· तस्य घर्मांशोः सूर्यस्य एतायोशपः वो युष्माकमंहसां पा
पानां विघातं नाशं शीघ्रं किंदधतु कुर्वंत्वित्यन्वयः· सकः पः विशीर्णा नासा चरणा हस्ता न्व्रणायुक्तैरपघनैरंगैरुपलक्षितान् अतएव घर्घरव्यक्तध्वनि
वदव्यक्तोदावः शब्दो येषां तथाभूतान् पतोः धोधैः पापसमूहैर्दीर्घकालं व्याघ्रातानाक्रांतानजनान् उल्लाघयन्नीरोगान् कुर्वन् घटयतिः अर्थात् घ्राणा

दिभिरंगैः संबध्नाति । कीदृशस्य घर्मांशोः अन्तर्हृदये हि गुणानां बहुलाद्यनानि विडायाघृणात्कृपातस्त्रिग्मानदापन्नानि निर्विघ्नाविघ्ननाशिकाः त्रिर्थ्यं वसा यो यए
वं बध्नाति । कीदृशस्य घर्मांशोः अन्तर्हृदये हि गुणानां बहुलाद्यनानि विडायाघृणात्कृपातिमिरपद्यनेति पाठे कृष्णविषय इत्यर्थः । घर्घरस्फुचलद्धारिधा
नइति विश्वः । उल्लाघो निर्गतो गदादित्यमरः । अत्रानुप्रासे कपरतयानीरसत्वात्कष्टत्वं न गुणो न का दोषः । परयेनेति । सर्वदः सर्वप्रदः माधवः श्रीकृष्ण
स्त्वां पायादित्यन्वयः । पंकः अभवेन निःसंसारिणा येन अनः शाकटं ध्वस्तं पादेन पर्यस्तं बलिं देसं जयतीति बलिजित तस्य सकायः पुरा अमृतमथनावसरे स्त्री
कृतः केटभी कृपतां यापितः यस्य उद्वृत्तस्य कालियभुजंगस्य हंता । रवे शब्दे ब्रह्मणि लयो यस्य सः अगराणां बलं यः मंडलं यत्र तद् रबलं यचक्रं उद्वृत्त भुजंगह
न चन्द्रस्येति वा । अंशी घ्रे च चक्रं गोइ इति विश्वः । अगं गोवर्द्धनगिरिं गां पृथ्वीं च वराहावतारे धृतवान् । यस्य अमराः शीर्षिं नमथ्नीतीति शशिमत् सकृत्त
च्छिद्रोहर इति स्तवनीयं नाम अर्हः अंधकानां यादवानां क्षयस्य द्वाख्ययापि तासकर्तेत्यर्थः । शिवपक्षे तु सर्वदा उमाया धवः । शिवस्त्वां पायात । सकः ध्वस्तो
मतो भवः कामो येनैवं भूतेन येन बलिजितो विष्णोः कायः पुरा त्रिपुरदाहकाले स्त्री कृतो बाणतां प्रापितः उद्वृत्तभुजंगो हारवलयानि यस्य सः यो गंगां शिर
सि अधाइपत । यस्याः शिरः शशिरः शशिमत चंद्रयुक्तमाहुः अमराः हर इति स्तुत्यं नाम चाहुः अंधकासुरस्य क्षयकरो नाशक इति । योवर्हिपत्रप्रिय इति
पाठे बर्हिपत्रं मयूरपिच्छं तत्प्रियः कृष्णः । शिवस्तु बर्हीयत्रं वाहनं यस्य स्कंदस्य तत्प्रिय इत्यर्थः । एवं इष्टभुजंगहेति पाठे इष्टो भुजंगहा गरुडो यस्य सः कृष्णः
। शिवपक्षे तु सुगममेव । अत्र कृष्णपक्षे शशिमत्सदस्पराहो अन्नप्रयुक्तत्वं क्षपयपदस्य च गरहे निहे निहतार्थत्वं न दोषः श्लेषनिर्वाहकत्वादिति परेक
रिहतेनेति । साधनस्य सेनायाः अन्तर्मध्ये प्रविश्योपसर्पन् गच्छन् पुंसो ध्वजः केतुर्विराजते इत्यन्वयः अन्तः कीदृशे । संबाधे । नाराचाद्भिः संकटे । क

७६

76

रिणां हस्तेन शुंनेन विलोडिते विस्फारिते इत्यर्थः अत्र साधनस्य स्त्रीवरांगस्यांतर्मध्ये प्रविश्योपसर्पन् गतागतं कुर्वन् पुंसो ध्वजो लिंगं विराजते · की
दृशे ततः संबाधे संकुचिते · कथं तर्हि प्रवेशस्तत्राह · करिहस्तेन · तर्जन्यनामिके श्लिष्टे मध्यमा पृष्ठतस्तयोः · करिहस्त इति प्रोक्तः कामशास्त्रविशारदैरि
ति परिभाषितेन विलोडिते विस्फारित इति गुप्तोऽश्लीलार्थो द्व्यर्थैः पदैः पिशुनपेशलरहस्य वक्त्रितिकामशास्त्रेणामुरतां रंभोपप्रक्रवार्तायाममिमत
त्वादुराः ५४ उन्नानेति · उन्नानच्छूनो जातशोफश्वयथो मंडकस्तस्य पाटितं विदारितं यदुदरं तस्यांत्रिभेतनुल्ये हृदिनिक्रितैस्तीव्रशेफो निरूपे कस्यकृ
मिभिन्नस्य सक्तिरासक्तिर्जायते तदा सक्तः कृमिरेवेत्यर्थः अत्रत्रांतिकथायां जुगुप्साश्लीलं गुरुः ः ५५ निर्वाणेति निर्वाणी संवरणो सूत्रधारो क्तिरियं ·
श्रीरणं प्रशमान्निर्वाणाः शांतो वैरमेव दहनोऽग्निर्येषां तादृशाः पाडुतनयाः पांडवा माधवेन कृष्णेन सह नंदंतु तथा कुरुराजस्य भतराष्ट्रस्य सुता दुर्यो
धनादयः सभृत्याः स्वस्था निश्चिंता भवंतु · कीदृशाः · कुरुराजसुताः रक्ताःऽनुरक्ताः प्रकंषेण साधिता भूर्यैस्तादृशाः क्षतो निवर्तितो विग्रहः कलहो यैस्तथाभू
ताः · अत्र प्रशमात नाशात · रुधिरशोभितभूमयः खंडितशरीराः स्वर्गस्थाः इत्यमंगलाश्लीलं भाव्यर्थसूचकत्वात् ग्राम्यमः ५६ इष्विति · राजानं प्रति कवेरु
क्तिः भो देव संप्रत्यधुना आवयोः सदनं गृहं सममिमित्यन्वयः त्वत्तो धनलाभानंतरं नसममिति संशतिपदाभिप्रायः सामम्येव श्लेषेणाह · इष्विष्वसादिना पृथ्व्यनि
मप्रतिकारनं स्वरस्य सुवर्णस्य पात्रे शोपत्रत द्राजगृहं · कविगृहं तु पृथुकानां बालानामार्तस्वरस्य पात्रे स्थानं · भूषिता निःशेषाः परिजना यत्र तथाभूतं
राज्ञः · कवेस्तु मुषित उषितः भूषणा यानि निःशेषपरिजनो यत्र तादृशं · तथा विलसंतीभिः करेणुभिर्हस्तिनीभिर्गहनं व्याप्तं राज्ञः · कवेस्तु विले विवरे सीदंति ते वि
लसत्का मूषकास्तेषां रेणुभिर्गहनं व्याप्तं · ववयोरभेदात यद्वा · विलसतकं जलं रेणुश्च ताभ्यां व्याप्तं च अत्रोक्तं विशेषणानां योग्यतया ततत्सदृशानुकू

राम्

७६

लार्थनिर्णयाज्ञस्तुतिनिर्वाहकतया संदिग्धगुणाः ५७ आत्मेति· श्रीकृष्णं बंधनोपगतं दुर्बोधनं अक्रूरात् । किं तु पाधितो वासुदेवस्वरूपं न जानातीति ए
वं तं स हृदे वं प्रतिभीमसेनस्य प्रयुक्तिः· मोहेनाज्ञानेनांधो वस्तुतत्वप्रतिपत्तिरहितो यं दुर्योधनस्तममुं श्रीकृष्णं पुराणमनादिं देवं परमात्मानं कथं
वेत्ति जानातीत्यन्वयः· तं कं· यं श्रीकृष्णं आत्मारामे ते प्रसाहृते द्विया: संतस्तदेकताना भवंति· आत्मैव वा आराम: क्रीडास्थानं येषां तथाभूता यो
गिनः । निर्विकल्पे भेदावभासशून्ये समाधौ योगे विहिता रतिः आसक्तिर्यैस्तादृशाः ज्ञानी तेनैकादात्मसाक्षात्कारद्वारा छिद्यरितो नातिः । तत्तमो ग्रंथिर्ज्ञा
वग्रंथिर्यैस्तथाभूताः सत्वगुणोत्कविश्रांताः संतो यं वीक्षंते पश्यंति· एवं विधानामेव वेद्यत्वे हेतुगर्भं पदसंदार्थविशेषणं तं तमसां स्पोति बांवायरक्षाद्दर्तमा
नमिति· रज्ञात्तमोऽभिभूते रलभ्यो मित्यर्थः अत्र वक्ष्क्षो श्रोत्रो वितततयाऽप्रतीतुं गुणाः ५८ षडधिकेति· मालतीमाधवे कसालकुंडलाः यां स्वयं परामर्शोऽयं
सः शक्तिभिर्नानेच्छादिकृतिभिर्वा त्मादिभिर्वा पणि द्रोपु क्रो: तएव तासां नाथ ईश्वरो जयतीत्यन्वयः· सकः यः षडधिकानां दशनाडीनां मिडादिषोडशनाडी
नां यच्चक्रं मणिपूराख्यं तन्मध्ये स्थित आत्मा स्वरूपं यो नीरूपं यस्य तादृशः हृदिविनिहितरूपः हृदये चिंत्यमानस्तद्विदां तथाध्यायतां सिद्धीः निमाघाद
दातीति तथाभूतः· पुनः कीदृक् अविचलितमनोभिः स्थिरांतःकरणैः साधकैर्मृगयमाणोऽन्विष्यमाण इत्यर्थः अत्र वक्तुस्तस्याप्यगुणत्वं ५६ फुल्लकुरमि
ति· विदूषकालभंजिकायां विदूषकोक्तिरियं· पुष्योत्करकलमभक्तनिभं वहंति ये सिंदुवाराविटपा मम वल्लभा ते येनालितस्य महिषीदधः सदृशास्ते किं च मु
ग्धविचकिलप्रसूनपुंजा इति संस्कृतं· कूरशब्दो भक्ते देशी· कलमाः शालयस्तदोदहनतुल्यं पृथोत्कर येवहंति ते सिंदुवाराख्याः विटपाः शाखाममवल्लभाः
प्रियाः शालोदनसदृशत्वं प्रियत्व बीजं· येनालितस्य वस्त्रनिर्जलीकृतस्य महिषीदधः सदक्षाः सदृशाः । किं चेति समुच्चये ते पि विचकिलप्रसूनस्य म

७१
77

ह्रिकाणुष्यस्य पुंजाम वल्लभा रत्यनुषंगः अत्र विदूषकोक्तौ ग्राम्यत्वं गुणः ६० गाटेति अमरूकवेरिदं पद्यम् सखीं प्रति कस्यचिदुक्तिः गाढालिंगनेन
खर्वीकृतकुचा चासौ प्रोद्भूतरोमोद्गमा तथा सांद्रो घनो यः स्नेहरसोऽनुरागस्तस्य रसस्तस्यातिरेकेणाधिक्येन विगलत् श्रीमतो नितंबस्याम्बरं वसनं यस्याः
सा तथाभूता हे मानद मा प का मां मा पीडयेति शेषः मां अतिमात्रं यापयेति शेषः अलं पूर्यतामित्यक्षरोल्लापिनी क्षामा कृशांगी क्षामेत्यक्षरविशेषणं वा
एवंभूता प्रिया निश्चलतातिशय्या तत् सुप्ता किं नु स्वापादिकृतचेष्टया अपि विरहमभिप्रेत्यात् मृता नु किं मित्रत्वेनानवभासमभिप्रेत्याह मे मम मनसि
लीना जतुकाष्ठमायेन संवद्धा किं स्वित् सत्यनुषंगः तथाभूताया अपि पृथक्कर्तुं त्राकत्वादाह विलीना नीरक्षीरवदैकमायत्ता नु किमिति अत्र पीडयेत्या
दिक्रियापदन्यूनतारसातिरेकव्यंजकतया गुणः ६१ तिष्ठेदिति विक्रमोर्वशीये पुरूरवस इयमुक्तिः सा उर्वशी कोपवशात् प्रभावेनांतर्धानविद्यया पिहि
ताऽपि न हि तावत्रैव तिष्ठेत् इति वितर्कः एतदुत्तरं नैतद्युक्तं पततिद्रागीयमयस्मात्सा उर्वशी दीर्घं चिरकालं न कुप्यति स्वर्गोपस्वर्गं गंतुं नु समर्था च भा
ववचनादिति च तथा उत्पतिताउड्डीना भवेत् अस्या मनः पुनर्मयि पक्षे हर्ते नाद्य सरसं तेनैतदपि नेति शेषः मद्वेदिस्मनंतरं नैजयत इति शेषः पुरस्तोऽपुनः
शाब्दार्थानन्वयप्रसंगात् सेयमपुरोवर्तिनी च तां प्रियां हर्तुं विबुधद्विषोऽसुरा अपि न शक्ताः ।। किमुतान्ये सा वा स्ततं नयनयोर्गोचरं भावप्राधान्याद
गोचरत्वं याता प्राप्तेति कोऽयं विधिः प्रकारो दैवं वा वर्त्तत इति शेषः अत्र दीर्घमित्याद्युक्तेः वाक्यार्थावगमेनैव पूर्वस्य वाध्यत्वावगमान्न्यूनत्वं न दोषः ६२
पदं च नेति वंचनायां प्रतारणायां माहिता स्या प्रितामतिर्येन सः कार्येऽनृत्सवतत्परः खलजनो वक्रचाटुगर्भं प्रियवचनमिश्रं यन्न हनकं मिथ्याभू
तं ब्रवीति तस्य अवेरोन विदंति न जानंतीति न किंतु विदंति कथं तर्हि ता त्वाप्युतीत्यत आह अस्य खलस्य प्रणयं चाटुभाषणादिरूपं वृथा कर्तुं न पारयं

राम ७१

तिन राकुर्वतीत्यर्थः। अत्र द्वितीयस्य न ञ्द्वयप्रयोगे नोक्तार्थकत्वे विसाधव एव ज्ञानं तीर्थ्यप्रयोगमप्यवच्छेदपरत्वाद्गुणत्वं ६४ वदवदेति। रणादागतं वा
रं प्रतिसेवामि नः प्रश्नः न हन्त सा गुप्तरं तव स्मीति जल्पं निन्त्यन्वयः पुत्रे मृते सति चित्रं विचित्रं हा हेत्यत्रो दीपदिति नं वधः। अत्र क्रमेण हर्षभीतिवि
स्मयविषादव्यंजकत्वादधिकपदत्वगुणः ६५ सितेति। हे विभाकरणाकारस्यर्यं तुल्य धरित्रीपालक राजन् सितकरस्यसंबंध्येतत्किरणस्य चंद्रस्य करः कि
रणास्तद्वद्रुचिरा विभा कांतिर्यस्याः सा कीर्त्तिस्तथा यो रूपकमलापरा कमललक्ष्मीर्लक्ष्मी स्वतव वैवास्ति ना— स्यास्तीति शेषः। यन्नु यो रूपमेवाधिष्ठानमभूत
कमलं यस्याः इति लक्ष्मीविशेषणत्वे नव्याख्यानं तद् एव तस्य वक्ष्यमाणत्वात्। मत्वर्थीयाच्च प्रत्ययेन कमलवतीति द्वितीयकमलायदार्थंगीकारे त्वे
वं मपिशकं वक्तुं ६५ तालेति नदाजायंते गुणाः पदानि सहृदयैर्गृह्यंते रविकिंरणानुगृहीतानि भवंति कमलानि कमलानि स्यासमात्पूर्वमेतत्। अत्र
द्वितीयकमलपदस्यार्थांतरसंक्रमितवाच्यत्वेन व्यंजनोपयुक्तत्वाद्गुणत्वं ६६ जितेंद्रियत्वमिति। गुणाधिके गुणोत्कर्षे। अत्रापि कारणमाला निर्वा
हकत्वाद्गुणत्वं। पदांतरेणानुवादे भेदप्रतिभासात् ६७ मम्मीति। मम्मा प्रहर्तारेवो निरंकुशोऽथ विवेकरहितो पितृत्वमपित्वपिपुनः प्रतीहि मक्किं न
प्रस्मरिष्यामीति संस्कृतं। उम्मीति पाठे भवामीति। रोहोइत्यरे होइति पाठे रे खदति रे खामर्यादा। नत्रिंपुसंस्मि मीतिपाठे न त्रिं चिंता। प्रमोक्ष्यामीति। कौमं
प्रति यो वनस्येप मुक्तिरितिकेचित् मलयानिलादि सहचारसंपन्नो कामं प्रतीयंतन्त्, लोक्तिरित्यस्ये। गुणं प्रति शिष्यो क्तिरित्यपरे। अयहत्तितास स्मारेर
वायेनसः निरंकुशोऽनुरोधशून्यः त्वपि पुनर्भक्तिं चितां वा त्वत्प्रेपि न प्रस्मरिष्यामि विस्मरिष्यामि त्वं प्रतीहि विश्वसिहीत्यर्थः। अत्र त्वं प्रतीहीतिवाक्यग
र्भितत्वे दृढप्रसपार्थतया गुणः ६८ सखीडेति। नवसंगमे आद्यसमागमे प्रणयशालिनी पार्वत्या दृष्टिर्वो युष्मान्शिवाय कल्याणाय स्तकीदृशी

न्या१

७८
78

दपितानने सव्रीडा प्रथमदर्शनाल्लज्जावती· मातंगचर्मरूपेणवोवस्त्रे सकरुणा· मातंगवधस्यस्याशोकोदयात्· भुजगे सर्पेण त्रासहिता· अमृतस्यंदिनि
चंद्रे विस्मयरससहिता॥ अंतरिक्षगामितया दुर्लभस्य ललाटे दर्शनात्· जह्नुसुतागंगया त्वत्कर्मके तत्कर्तृके वा अवलोकनविधौ सतीति सप्तमी· तेन
तस्याईर्ष्यालित्वनत्वे। लाभः कपालस्फोदरोगर्भेदीना· मतिस्थानं तद्दर्शनात् अत्र व्रीडादिव्यभिचारिणो वाच्यत्वं दोषः ६९ नामिति· तां नायिकां नेत्रयोर्गो
चरे कृतचतोस्य कोप्यनिर्वाच्यो निर्वृतरोयनो रसः अजायतेत्यन्वयः कीदृशीं· अनंगस्य जये मंगलसंपत्तिरूपां। किंचिदुच्चे भुजमूले कुचसंधौ लोकितां दृष्टामि
त्यर्थः अत्र रसस्य स्वशब्दवाच्यत्वदोषः ७० आलोक्येति एषप्रियः कोमले कपोलतले मिषिक्तः एव पुलकादिचिह्नैर्व्यक्तो योनुरागस्तेन सुभगां अत्र अभिरामा
रसरागियामूर्तिर्यस्यास्तां दृशीं नायिकामालोकयन् भृंगारस्य सीमनि तरंगितं अविच्छिन्नखेलनं आतनोतीत्यन्वयः तथा खेलने हेतुगर्भविशेषणमा
ह· बाल्यमतिहृत्यातिक्रम्य विवर्तमानः पुलककटाक्षादिभिश्चेष्टमानः इत्यर्थः अत्र विशेषतः शृंगारपदवाच्यत्वं ७१ संप्रहारेति संप्रहारे युद्धे प्रहरणो
द्यतयोः परस्परं ये प्रहारास्तेषां समरणात्कारैरुत्ताटृशशब्दैः करणगतैस्सस्यप्रहृतवीरस्य कोप्यनिर्वचनीय उत्साहो ऽभूदित्यन्वयः अत्रोत्साहस्य स्थायिभाव
स्य वाच्यता ७२ कर्पूरेति· तस्यपूर्णः सा नायिका नयनावनेने नेत्रप्रसारणाभूमौ नेत्रगोचर इति यावत् अभूदित्यन्वयः कीदृशी लीलया शिरः संबंधिनें
शुकस्य योनिवेशविशेषस्तस्यहृत्स्याकारणेन व्यक्तात्तनयोरुन्नतिर्यस्यास्तथाभूता कस्मिन्सति· कर्पूरधूलिवत् धवलेन द्युतिपूरेणाधौतं प्रक्षालितं दिशां
मंडलं येन तथाभूते शिशिररोचिषि चंद्रे सति· तेनोद्दीपनप्रकर्षः। अत्र पुनिः शृंगारानुभावः कष्टगम्यः ७३ परिहरतीति· वत खेदे विषमा दशा विरहावस्था
अस्या देहं प्रसभं हठात् इति एवंप्रकारेणा परिभवती प्रत्र विभावः कष्टगम्यः शोकेप्येवं भावात् ७४ प्रसाद इति मानवती मालतीमाधवस्येयमुक्तिः हे प्रिये प्रसा

व१

रा म०
७८

देषत्वाभवेत्यर्थः मृदं हर्षप्रकटपरुषं कोपं संत्यज अमृतमिव नेत्रवचः शृण्वंति शुष्यमाणानि अर्थान्मम अंगानि सिंच तु:सौरभ्यानां विधानसाकर्तुं रुषं त्य
गामभिमुखं स्थापय· मुग्धे विवेकरहिते गतः कालरूपो हरिणः प्रत्येतुं पुनरावर्तितुं न प्रभवति शक्नोतीत्यर्थः हरिणत्वारोपेण चपलत्वं ध्वन्यते· न च शृंगार
प्रतिकूलस्य शांतस्य विभाव इति दोषः ॥७५॥ निकुंज इति निभृतरमणालोचनपथं पतिते गुरूणां मध्ये सकलपरिहारहृदया वनगमनमेवेच्छति वधूरि
ति शेषः· निभृतरमणो गुप्तकामुके गुरूणां मध्ये लोचनमार्गं पतिते सति सकलस्य गृहकार्यस्य परित्यागे हृदयं यस्यास्तथाभूता वधूस्तेन सदा वनगमन
मेवेच्छतीत्यर्थः अत्र विन्नैर्व्याजं न गमनं सकलपरिहारको शांतानुभावत्वेन प्रतिभासः इंधनानयनादिव्याजोपनिबंधे तु न दोषः ॥७६॥ औत्सुक्ये
नेति· नवे संगमे हसतो हरेणाश्लिष्टा सत्येव संरोहत्पुलका उद्गतरोमांचा गौरी वः शिवायास्तु· कीदृशी· दयितसमीपगमने औत्सुक्येन द्रुतत्वरा· सहभ
वा सहोत्थया स्वाभाविकयेतिपावलितहिया लज्जया प्रत्यावर्तमाना परावर्तमाना· पुनस्तैस्तैस्तत्कालोचितैर्वधूवधूजनस्य वचनैरभिमुखं संमुख
त्वं नीता प्रापिता· तथा अग्रे चरं दृष्ट्वा आत्तो गृहीतः। साध्वसरसो भयरसो यया तथाभूतेत्यर्थः अत्रौत्सुक्यस्य संचारिणो वाच्यता न दोषः असाधारणात्र
भावाभावेन तच्छब्दत्वासंभवात्· अत एव दूरादुत्सुकमित्यत्रापि औत्सुक्यमेव शब्देनोपात्तमिति दिक् ॥७७॥ पांडुक्षाममिति· हे सखि तव पांडुक्षामं वद
नं सरसं अत्र स्मरसहितं तं निरालसं वदृ दर्पं अलसं आलस्ययुक्तं वपुश्च हृदं तः क्षेत्रियं रोगमावेदयतीत्यन्वयः क्षेत्रियः देहान्तरचिकित्स्यो असाध्यरोगः सर्व
शरीरव्यापि पीडाजनक इत्यन्ये प्रत्येक्षिप्तं क्षेत्रं जनितरोगं परदारास्तेपि च· अन्यदेहचिकित्सार्हाः साध्यरोगे च जायत इति विश्वः ॥७८॥ सत्यमिति अत्रांगनापाश्र
यांगभंगः कठासस्तद्वल्लोलं अस्थिरं· तथा च रामादीनां रमणीयत्वेपि जीवितस्य भंगुरभयात् तस्यापेक्षाणामनुरूपादिमत्वमेवेति शृंगारबाधेन शांतेपर्य

वसानमितिन विरोधः ७९॥ म्रदेत्तु दिग्धानिति· पुष्ठेयतिता वीरादेवत्वलाभेन विमानपर्यंकतले निषण्ण उपविष्टः संततत्तदानीं ललनानामप्सरसा
मंगुलीभिर्निर्दिश्यमानानात्मदर्श्यमानान्स्वदेहान् रणपतिताः कुतूहलाविष्टतया आश्चर्याविष्टतया अपश्यन्निलयन्त्वयः· कौतुकहेतुगर्भीकृतिक्रमेणाक
र्मकर्त्तं विशेषणान्माह भूद्रेरिस्वस्रादिभूसंबंधि रेस्रुनाव्याना नवनवानां पारिजातमालावांरजोभिः परागैर्वासितानि सुरभीकृतानि वाङ्कोर्मिध्मान्यंतरा
लानियेषां ते· शिवाभिः क्रोष्ट्रीभिर्गाढमालिंग्यमानान्स्वदेहान्· सुरांगनाभिरप्सरोभिराश्लिष्टं भुजयोरंतरालं वक्षोयेषां ते· सहधिरैः क्रव्यभुजां मां
सादीनां स्वमानां गृध्रादीनां स्फुरद्भिः पक्षैः पवीज्यमानानात्मदेहान्· चंदनवासिसेकैः सुगंधिः कल्पलतोत्थैर्द्रुकूलैः स्वर्द्रुवस्त्रैः संवीजिता वीराः अत्रय
जितस्वदिहसुरांगनालेपनपेशीभिरस्य शृंगाररयोर्मध्ये वीरस्य निवेशान्न विरोधः ॥८०॥ अपंमितिव्याख्यातं प्राक्· अत्र स्मर्यमाणाच्छृंगारस्य करुणो
द्दीपकतया तदंगत्वान्न विरोधः ॥ दंतेति· अपत्यं प्रसूयत इत्येव भोक्तुमुद्यतायै सिंह्यै तदपत्यदयया स्वांगमर्पितवंतं जिनं प्रतिकस्य चिदुक्तिरियं· हे जिनभू
वतः शरीरे रक्ते रुधिरे मनोपमा तथाभूतयैव अनुरक्तमनसा मृगराजस्य सिंहस्य वध्वैव मृगजातीयराजवध्वा दंतक्षतानि करजैर्नखैर्विपाटिता
नि विदारितानि च दत्तान्यर्पितानि जातस्पृहैर्देवैर्मम त्वेवं विधाभूयासुः तज्ज्ञातामिलाषैर्मुनिभिरप्यवलोकितानीत्यन्वयः कीदृशे शरीरे परपरित्राणाह
र्षसोद्भिन्नाउद्धतासान्द्राः पुलकारोमांचा यत्र एवंभूते· पक्षेऽनुरागात्तथाभूते· अत्र दयावीरस्यानुभावविशेषे शृंगार उपमानभावेनांगं ८१ क्रामंत्यइ
ति· सज्जो नं प्रतिकवेरुक्तिः हे राजन् अस्त्र पुनात्वद्वैरिनार्यः भीत्याभयेन भर्त्तृकरेषु अवलंबिताः करायामि त्वादृशो भूत्वा दावाग्निं परितः दावानलस्य सं
मंततोभ्रमंति· पलायनवनेप्यत्युत्तानैः उत्क्षिप्ते· पुनरप्युपजायमानो विवाहो यासां ताइवेति तत्रापि भर्त्तृकरंगृहीत्वाग्नेः परितो भ्रमणात्· कीदृ

रुपः॥ दर्भाङ्कुरैः क्षतानामः कोमलाङ्गुलिभ्यो गलद्रक्तं येषां तैः पादैः सदर्भाः स्थलीरपरामुद्देशान् क्रामिता लङ्घयन्त्यः यान्तिस्म यावत् कोलाक्षारस्रोपेषु
तथाभूतैरपि चेत्युत्प्रेक्षाविवाहोत्प्रेक्षासमर्थनाय· एवं सदर्भा इत्यपि· तथा गलता बाष्पाम्बुनाऽश्रुजलेन धौतं प्रक्षालितमाननं यासां ताः· विवाहे
पिधूमादश्रुनिर्गमः अत्र प्रधानभूते राजविषये रतिभावे ह्यावपि करुणशृङ्गारावङ्गमिति न विरोधः॥८२ एहीति· एहीत्यादिप्रकारेण गारुपग्रहा
क्रान्तैरर्थिभिर्याचकैर्धनिनः क्रीडन्तीत्यर्थः अत्र एहीति क्रीडन्तीति रीत्या सर्वेषां प्रधानभूतक्रीडान्वयादागमनगमनयोर्न विरोधः ८३ क्षिप्त इति· अ
मरुकवेरिदं पद्यं· सः॥ त्रिपुरदाहकालीनः शंभुसंबंधी शराग्निर्वो युष्माकं दुरितं पापं दहत्विति सम्बन्धः सकः यः आर्द्रापराधः अभवहितापराधः कामीव
हस्तयोरवलग्नः सन् साश्रुनयनाभिर्नीलोत्पलाक्षीभिः सहिते नेत्रोत्पले यासां तथाभूताभिस्त्रिपुरयुवतिभिः क्षिप्तः प्रक्षिप्तः तथा प्रसभं बलात् अंशुकान्ते
वं स्पृशन् आददानो गृह्णन् अभिहतस्ताडितः तथा केशेषु गृह्णन्त्रपातः चरणयोर्निपतितः संभ्रमेण भयेन आदरेण च नेक्षितः तथा आलिङ्गन् अवधू
धूतः क्षिप्त इत्यर्थः अत्र यथा पूर्वकामुकः कराग्रं गादिकमकार्षीत् तथा संप्रति शराग्निरित्युपमानतया शृङ्गारपरिपोषितेन करुणेन भगवतः शंभोः प्र
भावातिशय एव प्रकर्षमानीयत इत्यनवद्यम्॥८४ इति श्रीमत्सद्वाक्प्रमाणमिश्रतत्सदुपाध्यायश्रीरामभट्टात्मजवैद्यनाथसूरिविरचितायामुदा
हरणचन्द्रिकायां सप्तम उल्लासः॥ अपसारयेति· हे आलि घनसारं कर्पूरं अपसारय दूरीकुरु हारं दूरय दूरीकुरु एव कुरु· अविरतं निरन्तरं विषमिव तीव्रं यथा स्या
देवं विसर्पति विविधप्रकारेण सर्वाङ्गीणं संचरति· अत एव प्रमाथी लोमकारी निर्धूमो विधुतः संधुक्षितः यावकवज्ज्वलति· तत अगरीयानुत्कर्षकाष्ठां
गतो ज्वर इव प्रसङ्गं हि नास्ति पीडयतीति विभिन्नधर्मा मालोपमा: अतो हे तोरितो मनोरगान्मां त्रातुं तातो दिकं न प्रभवति शक्नोतीत्यर्थः निर्धूममि

ति पाठे विधुतं इति क्रियाविशेषणं २ चित्त इति · विरहिणा उक्तिः । चित्ते चमत्करोति नन्दयति स्नातुं तोषु शय्यासु लुठति विसर्पयति दिग्धु खेषु वचनेव
र्त्तते प्रवर्त्तते काव्यबंधे ध्यानेन नन्दयति क्षणांतरं न तु प्रगल्भेति संः न खलु तूर्णं चर्मे चिरं दृति प्रसिद्धं तद्दृशा चरतीत्यर्थः इत्यन्ये · गाढं लग्ने त्यपरे · गुणे
षु नन्दयति पपर्यवसानं न प्राप्नोतीत्यर्थः नहीयत इति केचित् · शय्यासु लुठनं दिक्षु विसर्पणं च भावनया स्वस्मोद्भूमीत · विसहृदीति पाठे चे विक
सति प्रकाशत इत्यर्थः वचने वर्त्तते वर्त्तते से ववचन विषयी भवति काव्यबंधे विषये व विषयी भवति तथा ध्यानेन नन्दयति सदा तद्विषयी भवती
त्यर्थः वचने वर्त्तते उपदेशं गल्लाति · उपदिष्टे च काव्यबंधे प्रवर्त्तते इति महेषाः ३ मित्र इति · संध्याकालीन चक्रवाकचेष्टा वर्णनं · मित्रे सूर्ये सुहृदि
च स्थाप्यगमवार्ता के देशे गते सति सरोरुहवने वहानने मुद्रिते अवचसि च नाम्यति लापयति शोकान्न प्यमाने च भ्रमरे षु क्रंदत्सु तारस्वरं श
द्वायमाने षु रुदत्सु च दयितया आसन्नं युक्तं सारसंपत्तिं गुरो ग्रेवी क्ष्य वियोगिना चक्राह्वेन चक्रवाकेन विसतन्तमाना स्वादिता नवो झिता सक्ता
· केवलं निर्गच्छतो जीवस्यार्गलेव वक्रे निहिता इत्यन्वयः । वियुक्तं दंत्रा नवसंयुक्ते दर्शनस्यापि विरहोद्दीपकत्वाद्भयप्रदर्शनं · अत्र विप्रलंभे जीव
निरोधोपेक्षा अनुपकारिका · ४ स्वर्गेति · वरवर्णिनी उत्तमांगनैव अतेनैव मानुषेणोव देहे न स्वर्गप्राप्तिः ननु दिव्यदेहे न स्थान विशेषप्राप्तिः अस्या
स्ततो ह्युत्कृष्टत्वात् तदाह अस्या रदच्छदसाधारस्य रसः सुधां मक्षरोतीति तरां अतिशयेन तिरस्करोतीति ५ अनंगेति · अनंगस्य रंगो नर्मस्थानं तस
देशं आनतांग्या मदनुभवैकगोचरं मंगंभंगीभिर्विलासवल्गैस्त्यांगीकृतं स्वयमादरेण गृहीतं यथा अंगीकारप्रकारेणेतामांपः पूनां स्वांतानि चित्रानि
शंतान्यपर विषयचिंतनानि येषां तथाभूतानि सहसा कुर्वतीत्यन्वयः ६ परिज्ञानमिति · इदं विस्मिता: कमलिन्याः यत्रात्मां न्यायवंतं लसः कुशांगाः संतायं

वियोगजातं यं वदति कथयतीत्यन्वयः कीदृशं · पीनयोस्तनजघनयोः संगादुभयतस्तनुमध्यस्थानयोः परिम्लानं · स्तनजकायशयना ततथानतोः
कृशाया मध्यस्य परिमलनेन संघर्षणप्राप्ययगत्वं तन्मध्यभागे हरितवर्णं तथा श्लथा निर्वलितया शिथिलाया भुजलतायास्तस्याः क्षेपे वलने स्थव्यस्तो
ऽन्यथाभूतो न्यासो रचनापरस्य तथाभूतं · इच्छापूर्वकत्वात् तदभावात् क्षेपवलनयोर्भेदः श्लथेनाक्षेपेणाभिघातेनया निचलनान्मृदुत्वेनानीत्यर्थ इति के
चित् ७ मन्थेति · रणस्थाने दुन्दुभिध्वनिं कृत्वा भो मत्स्येन स्मायं भवत्सु अथ शब्दायमानो दुन्दुभिः केन ताडित इत्यन्वयः कीदृशः मन्थो मथनं तेनायस्त
मांदोलितं पदार्णवस्य अमृतेन स्नुतं यान्तं कुहरं गुहा यस्य तादृशस्य चलतो मंदरस्य गिरेर्ध्वानिव ध्वनिः स्तुतीति पाठे अमृतैः स्रुताकुहरे प्रचलनयो
मंदरध्वानइत्यर्थः कोणो वादनदण्डः तदभिघातेषु सत्स्वपर्वदामेरीणा तसहस्त्राणि टक्काशतशतानि चः एकदा यत्र हन्यन्ते कोणाघातः स उच्यते इ
ति प्रतिभाषितं कोणाघातेषु सत्सु तदन्तर्गतो यं गर्जः सोः प्रलयकालीनाया घनघटाया अन्योन्यसंघट्टबद्धं डोडारूपादित्यर्थः कृष्णायाः प्रयाः को
धस्याग्रे वर्तमानो दहनः प्रज्वलपुलकत्वात् क्रूरकुलस्य निधनं द्रव्यतदर्थं मुखात् तद्रूपो निर्घातसहितो वातः · मेघानां वातानां चान्योन्यसंघट्टजश्च
डध्वनिर्निर्घातः । तथा नृसिंहस्य सिंहनादः प्रतिरसितस्य प्रतिध्वनेः सखा सदृश इत्यर्थः ८ प्रोतेति · वीरचरिते वैतालिकस्येयमुक्तिः एतद्रीमं कुंभकर्ण
स्योत्तमांगं शिरो वितत्या काशाशा व्यिपततीत्यन्वयः कीदृशं कंधरां भ्रमाजं अत्र तत्प्रविशनां महतां सत्वा रात्ता दृशा वेः काकुत्स्थवीर्यस्य श्रीरामचन्द्र
पराक्रमस्य स्तुतिमिव कुर्वत् कुर्वाणं तथा प्रोटस्य महावेगप्रयुक्तस्य छेदस्य तद्रूपेणोच्छलनस्य रयेण वेगेन भवत्याः सेहि केयस्य राहोरूपघातत्रास
तेनाहृष्टेष्वेत्तिर्यक्वलितो वक्रतया संस्थापितो रयो येन तथाभूतेनारूपेणेदं ईक्षमाणं दृश्यमानमित्यर्थः ९ इति श्रीमत्स्यदवा नवमारणाभिव

८१

४१

नत्सद्रामभट्टांगजवैद्यनाथकृतायामलंकारचंद्रिकायामष्टमउल्लासः॥ ॥नारीणामिति। नारीणां स्त्रीणामनुकूलमाचरसि चेज्ज्ञातासि ज्ञाता
भवसीत्यर्थकं अरीणामनुकूलंमाचरसि चेज्ज्ञातासीति यो जपित्वा कश्चित्तनो भूत्वा वामानां प्रतिकूलानां हितमातनोतीति। वामानामित्यत्र कामि
नीनामित्यर्थः कल्पितः प्रथमः पुनराह भवान् अबलानां स्त्रीणां हितकृत्त्वेन भवतीति। अपरस्तु हितं कृतं तन्मति छिनत्तीत्यर्थं परिकल्प्याह बलाभावे
न प्रसिद्ध आत्मा स्वरूपं यस्य तादृशजनस्य हितकर्त्तानं किं युक्तमपि तु नेति। प्रथमस्तु अबलस्य देहस्याभावेन नाशेन प्रसिद्धस्वरूपं येषां दृश्ये त्यर्थं परिक
ल्प्य पुनराह भवतः पुरंदरस्य मतं दृष्टं तच्छेदं नाशं विधातुं कुतः सामर्थ्यमिति। सामर्थ्ये सति युक्तायुक्तविचारस्तदेव तु भवतो नास्तीति भावः। अत्र वक्रो
क्तिरलंकारः १ अहो इति। अत्र दारुणो यस्य काष्ठेनेत्यर्थं परिकल्प्यान्य आह त्रिगुणो ति सत्त्वादिगुणत्रयवतीत्यर्थः। अत्राभंगश्लेष इति मर्वस्माद् दः
र गुर्विति हे सखि वयस्य रूपराधीन तथा व तत्खेदेऽदूरतरं देशं गंतुमुद्यतो सो कांतः अलिकुलैः कोकिलैश्च ललिते मनोहरे वसंतसमये न गमिष्यतीति
नापि कपोक्तं वा को सत्योक्ताकाक्वा न एष्यत्यपि तु ऐष्यत्येव अन्यथा यो ऽस्ते इति काकुवक्रोक्तिः २ तत इति। अरुणस्य परिस्पंदेन सवारणोदयेने
तियावत् मदी कृतं निम्रमीकृतं। कामेन परिक्षामाः पाः कृशायाः कामिन्याः गंडवसो दुतांदधे धारयामासेत्यर्थः अत्र स्पन्दमन्दीति रांतु इति च नका
रदकारात्मकस्य णकारडकारात्मकस्य चातेकव्यंजनस्य सकृदावृत्तेश्छेकानुप्रासः ३ यस्येति। यस्य पुंसः सविधे समीपे दयिता नास्ति तस्य तु हि
नदीधितिश्चद्रो दवदहनः। विरहोदीपकत्वपादावाग्नितुल्य इत्यर्थः उत्तरार्धे तु दावाग्निश्चंद्रतुल्य इति विपरीत उद्देश्यविधेयभावश्च स्यान्वयमात्र
भेदाल्लाटानुप्रासः ४ वदनमिति। सस्मितसद्भंगीकारैः वरवर्णिन्या ऽन्नमवनिजायास्तस्या वदनं सुधाकरश्चंद्र इति सत्संपरं तु सः कालंके न वि

राम

८१

कल्लो।हितः पुनः कन्नुमवेक्षंनवेदतो नैवमित्रख्यापरोप्या। यवादः पूर्वं सुधा कस्पंदं विधेयपरं उत्तरं त्वत्तुचापपरंमिति तात्पर्यमदेः ५ क्षितेति· सम
मेव्याख्यातं· सत्त्रा रीति· हे राजन् सतीर्न्नारीविं मन्नीति भरशातता मुमांपाती तिपत्तं उमासहितविधुशेखरं हरमाराध्यतत त्तदा राधनादेव हेतोस्त्व
ममापोदं मशत्रुः सन्पृथ्वीं जयेत्यन्वयः· कीदृशस्त्वं· सत्त्रा अवसादगतात्र रीणा मिमायन्नतादृशो रोपपस्तस्य सइत्यर्थः ६ विनेति· अयं महाजनः
।विनापक्षिरूपेणायमेनमानसाच्चिन्तातत्र अंशीघ्रं पतमानानां सादमवसादं राति ददाति पथा तथा अदीयत अस्वेभ्यते स्यन्वयः कीदृशेन· ए
नः अपराधविनानयता स्वस्थानं प्रापयता· असुखादिनाप्राणोमक्षकेण· सुखादिना ■ ऊनयता मूनं कुर्वता· कीदृशो महाजनः· महान्तमजं नंद
तियागार्थेहितस्तीतिजयाः महमुत्सवमजंतिक्षिपंतियेदुर्जनास्तत्त्रोदीनदयसारकइतिवा· अन्येतु· विनागरुडाख्यपक्षिणास्येनउनयता हानिप्रापय
यता· सुखादिना सुखभक्षकेणेति व्याचक्षुः ७ सतारमिति सतु प्रकृतो राजा आरं अदिसमूहं सर्वदा सर्वकालं अवश्यं निश्चितं मरतः अतिशयेन रणां
पुद्गमानो बाणप्रापितवानित्यन्वयः आरं कीदृशं अबलं सैन्यमूल्यं· वितते विस्तृत आरवः शब्दो यस्य ततः दीपिकाह्ह तत्त्कद्वयमप्यनेबीदितिक्रिया
विशेषणं तेन सैन्यमनपेक्ष्यैव सिंहनादं विस्तार्य समरसंचारं चकारेति पर्यवस्यतीसाकूः कीदृशः अलं तमदं अवान् अगच्छन् शीघ्रं गच्छन्नित्यर्थः अ
स्थितस्यति उपक्षिपती त्यस्थितः स्रांतत्वेष्यधातो रितितिबे धा हीर्घत्वाभावः पद्मा एविश्रो स्थितनत्तत्स्यर इत्यर्थः पुनः कीदृशः इत्यपेक्षायामाहः श्लोकः
सत्वगुणेन पश्चारं भत्तत्तरतः पुनः कीदृशमारं अवश्यं असाधीनं अबलं वितानिवस्त्रतयासीद्धता नितारवाति तरुसंवं थिवल्कलानि येन ततः
तारवं तरूसमूहइतिकेचित तरूधर्मइत्यन्ये· सर्वेषांदारणो यो मानस्तदैषीत दिक्षावशीलो राजा· तथा दवानलेन समस्तुसः ।। स्थितः तेन संमंस्थितं त्यि

तिरस्येति वा शत्रुसंतापकत्वादीप्तनमत्वेन च दावाग्निसाम्यं ८ अनंतेति· अनंतेन महिम्ना या मुंडुर्गीयमाना तादृशी यां वेधाः। ब्रह्मापि न वेद
तत्वतो न जानाति· सा च प्रणतेभ्यो मानवेभ्यः मनुष्येभ्यो ऽभ्युदयं भजतु इत्यन्वयः। ९ यदानतइति यस्योपमानतो ऽपंजनः नयास्यमनीतिना शनयातिन प्राप्नो
ति· कुतः अपंदानतः अपरस्य भावह्विवेत्तबेवदानात्· यद्वा अपस्पदानतः खंडनाद्योनयास्यमइति योऽस्ना शिवेकस्याणानिमित्तंस्मराभि·
कीदृशीं शिवेन शंभुनाईहितां अर्थितां· ईहितां अनुकूलां· कस्मात् ईहितामिति वा· तथा स्मरेणाकंदर्पेण नामितां अपरिच्छिन्नामित्यर्थः १० सरस्वती
तिन्हे सरस्वतिवाग्देवि स्वति सुषु अतिशयेन प्रसादं सरगछ प्रसन्नामवेत्यर्थः मेमम चित्तरूपे सरस्वति समुद्रे स्थितिं कुरु· सरस्वतीशब्दस्य नदी सामा
न्येपि शक्तत्यास्ते षेणा तस्याः समुद्रे स्थित्यभिधाने· कथंभूते से त्रे शरीरमेव कुरुक्षेत्रं तत्र सरस्वति· सरस्वत्याख्य नदीरूपेइत्यर्थः ११ ससारेतिं श
रत्कृतुः कंदर्पेण साकंदर्पेणागर्वेण ससार आजगाम· कीदृशी सारसंपत्सारसः पक्षिविशेषो वा तत्सहितानवा तिंअतां सितशकंठानियस्यां सा
नवानाः शरकांडविश्राणायोवयंती परिपाकं प्रापयंतीत्यर्थः शारंकाशमित्यन्ये· न विद्यते वीनां पक्षिणां भ्राणध्वशब्दो यस्यां सा अविभ्राणाय वंभूतान
परिशब्दसहितेत्यर्थः नवान्ततना १२ मधुपेति जगत्कर्त्रि प्रियं शोभामभृत आधारयत् कीदृशं मधुपरागमामरयं तृणापराजिनानिधेर्याद्याति
तानि मानिनीजनमनांसि याभिस्तादृशीभिः सुमनोभिः पुष्पैः सुरभि· वारितो निवारितः वारिजानां कमलानां विप्लवो नाशो यत्र तत् स्फुटितानि
विकसितानि तामरसाण्यारुक्तानि तानि विस्तीर्णानि आश्रयाणां वनानि यत्र तत्· अन्ये तु एवंभूताः सुमनसो यत्र तादृशास्य सुरभेर्वसंतस्य प्रियमि
त्येकपदतयाव्याचक्षते· ताशब्दसुमनमां सुरभिप्रियं सौरभसंपदमिति। तुनयुक्तं सुरभिपदस्य सौरभविशिष्टेष्वेव काव्ये प्रयोगदर्शनात्

ननु सोऽरमे गुरोऽइति दापिकायां १३ अलंकार इति । विधौ वंद्र एव च विधौ दैवे वक्रे कुटिल एव वक्रे प्रतिकूले मूर्द्धि मस्तके स्थित व तिसर्व मित्र गु
रोः सर्वदेवश्रेष्ठस्य स्थाणोर्महादेवस्यापीयमवस्था भवति अमी मानुषा वयं पुनः केऽत्र स्मागणना या मित्यर्थः अवस्थामाहालंकारे इति । शं
काकरं भयजनकं नरकपालमेवालंकारः विशीर्णा जीर्णा परिजनः पक्षः सोऽपि वृद्धवृषो यस्य तथाभूतो निजी स्त्रीर्णो वृषः वसु धनमिति । अत्र
विधाविप्रवर्त्ते वृत्तीयोः श्लेषः १४ दृष्टेति पदश्लेषो दाहरणं समसेव्यात्कृतं । भक्तीति हरे ते त्वत्र वीप्रभाकं भवस्य संसारस्य सारस्यार्त्तेः पीडायाः
शमनं कुरु तामित्यन्वयः किंभूते नेत्रे । भक्तिप्रह्वा भक्तिनम्रा स्तत्क्रमिके विलोकने प्रणयोपेतो नीलो स्वलमस्पर्द्धायुते । समाधिनिर्रनेर्ध्यानेतालो
कनं प्रयोस्तत्तानीते प्राप्ति तेन वा च परमहानिधिरूपे । लक्ष्मी दृष्टेः स्त्रिकतां तन्वती कुर्वाणो । तनु पक्षे तु भक्ति प्रोक्ते यदि लोकन तपणापि नीनीलोत्प
लस्पर्द्धा शीला । ताच्छील्येष्ठिति । तनोनीलताज्जस्पर्द्धाः इति तत्स्येष्टस्य प्रासये ध्यानालोकनतानीता । महानिधिरितिच्छेदः दूलोपे इति दीर्घः कुरुता
मित्यात्मनेपदे लोडेकवचनं लेत्र पक्षे परस्मैपदेत द्विवचनमिति । सोयं नपुंसक स्त्रीलिंगयोः श्लेषः १५ महदे इतिः संस्कृतपक्षे हे उमे गौरि मम आग
माहरणो विघ्नोपार्जनेन समासंगः अवरस्स अवसरे न विन्नमोहं सहसा हरस्या आगमाहरणो कीदृशे महदे उत्सवदायके । संबोधनविशेषणं चैतत् । की
दृशं समासंगं । सुरैर्दैवैः संध्यधासंधानं मिलनं यस्मात्तादृशं । कीदृशं चिन्नमोहं वृद्ध अनेकश्यायसरणं प्रसरणं यस्य तं । वृद्धसरणां संसारोपस्मादि
निवार्थः प्राकृतपक्षे तु मत्यं देहिरसंधर्मेतमो व शमा मां गमागमा गमा दूरनः हरवधुप्रारणं त्वं चिन्नमोहोऽपसरतु मे सहसेति संस्कृतं । इ संप्रीतिंत
मो व शांतमोगणाप्रज्ञां गमागमात् संसारात् । शरणं त्वं भवसीति शेषः अयं संस्कृत प्राकृतप्राकृत रूपभाषा श्लेषः १६ अयमिति सामर्थ्यं हंततिक

रोतीति च सामर्थ्ये कृत· वक्ष्यतीति· हृदि धारयिष्यतीति ते युयुधे युकथयिष्यतीति वह्निव ओर्ल्दि प्रकृतिश्लेषः जथाकृदिति कृंत तिकरोसोःक्षि
पिसः १७ रजनीति रजनिरमणाश्चंद्रो मौलौ यस्य तस्य हरस्य पादपद्मावलोकनमेव क्षणउत्सवस्तत्समये परासंशास्तं अपूर्वं संपस हस्तं यत्र त
द्यथास्यात्तथा अहं जातचित्प्रथनिवहमध्ये प्रमथानां गणानां मध्ये उचितोरूचिपीतिर्यस्य उचितारूचिदातिर्वा यस्य तादृशो नंदितानंदकः स्वामिस्त्वा
शंसा· तथा सति सानंदितानंदिनो गणविशेषस्य भावो मे मस्त्वादित्यर्थः· अत्र सांख्यादित्यत्रमप्रथमपुरुषयोर्न द्विजेति तत्र चतलोः प्रत्यययोः श्लेषः १८
सर्वस्वमिति· हे हरशंभो त्वं सर्वस्य सर्वस्वं पतितो भवस्य संसारस्य छेदे तत्परः· नीत्युपकारयोः सांमुख्यं आतुकूल्यमायासि आगच्छसि· कीदृशां सांमुख्यं· त
नोः शरीरस्य वर्त्तनं स्थितिर्येन तादृशां· पक्षान्तरे उपकारयोः सांमुख्यं यत्र तादृशं तनुवर्त्तनं शरीरवृत्तिमायासि· सांमुख्येन तनुवर्तनं चापासीति वार्थः
पक्षे चोरं प्रतीयमुक्तिः त्वं सर्वस्य सर्वं स्वं हर अपहर छेदनतत्परो भव उपकारसांमुख्येन यत्र अपहाराय· आयासि कच्छशालिवर्त्तनं जीवनं तनुविस्तार
यति· अन्येतु· सर्वस्वादिकं हरत्वम तथा तत्र अपिदिकहंकाररूपेन मुक्तिः स्यादिति यस्मात् अहमिच्छामीति रीत्या परमेश्वरं प्रत्येवेपमुक्तिरित्याहुः अ
त्र हरेत्यादिसुप्तिङ्· विभक्त्योः श्लेषः १९ यो सहृदिति· सविबुधेंद्रः पंडितश्रेष्ठो राजाराजा [illegible] राजतेयः असकृत् अनेकवारं परगोत्राणां शत्रवं
शानां प्रक्ष्यस्य सहायवर्गस्य छेदे क्षणो न वक्षमः समर्थः छेदनपेक्षणोऽस्मवदितिवा· शतकोटीर्ददातीति तथा तन्नाविभ्रतधारयन्नित्यर्थः इंद्रपक्षेतु· वि
बुधेंद्रो देवराजः परगोत्राणां श्रेष्ठगिरीणां पक्षछेदे समर्थः तच्छेदे शतकोटिनावज्रेण घपतिखंडयतीति तथा नन्नामित्यर्थः· अयं चाभंगश्लेषः २०
स्वयं चेति न केवलस्वामिस्तोपेक्षतयेव फलप्रदायोरीकिंतु स्वयं च स्वयमपि अस्त्रायेदुःशायेफलेलु धानामिष्टप्रदेत्यर्थः केवप्रमातं संध्येव·

कीदृशी पल्लवानामौन्नत्यं पल्लवाग्रलोभास्तवकांतिपुंतोकरोहस्तौ ताभ्यां विराजिता शोभिता· संध्यानुतादृशोऽर्भस्वतः सूर्यस्य करैः किरणैर्विराजिता॥ तथा अ
न्यायस्तदानीं निद्राभावस्तस्मात् लं लक्ष्मीलाभस्तत्र लब्धे जनेहितप्रदेति २१ स्तोकेति चंडीदासः दंडइत्यन्ये॥ अपंचशब्दपरावृत्तिसहत्वादर्थश्लेषः २२ कमल
मिवेति· कचतिदीप्यते· सकलेति· कलकलः कोलाहलस्तत्सहितं पुरं· विंवं तत्सकलायत्त्र तादृशं देवेति· हे देव विश्लोत्वमेव पातालं· आशानां दिशां निचं
धनं नियमनस्थानं· अमराणां मरुद्रूपा भूमिः स्थितिहेतुः देवानां वायोरूपर्यवस्थितेः· लोकत्रयात्मको भुवनत्रयात्मक इत्यर्थः राजपक्षे अलंपातारक्षिता·
आशानां मनोरथानां निवंकाराणां चामरासंबंधिपवनभाजनं· पालक वदस्यभोक्तृत्वस्य राजनत्रयात्मक इति २३ अविंद्विति अक्षप्रतिविंवितं इंदुरविंदुस्त
दृक्संदरी· गलं नौलावण्यस्य विंदुका पस्याः इत्यक्षेक्षागर्भे· अविंदुविंदुशून्या· गलद्विंदुकावेति विरोधः॥ नान्यः कविरिति· अल्पः क्षुद्रः श्लोकोपपदास्ति यद्येवे
ति कोशः· अनुरागे जिः अनुरागः स्नेहो लोहितत्वं च· पुरःसरोऽग्रगामी· समुत्वस्य· समागमो मिलनं· स्त्रीपुरुषसंगमश्च॥ २४॥ आदायेति यो विषमदृष्टि
स्त्रिलोचनः अचलं हिमाद्रिस्वरूपं चापं धनुरादाय अहीनं सर्पराजं गुणं मौर्वीकृत्वा अच्युतो नारायणः शरो यस्य तादृशः लक्ष्यं त्रिपुररूपमभांक्षीत् अभं
जितवानतस्मै नमः इति मुख्योऽर्थः अचलं चलनशून्यं धनुः हीनो जीर्णः॥ अथवा अहीनो धनुर्दंडादन्यूनपरिमाणो गुणः विषमा लक्ष्यादन्यत्र निहिता दृ
ष्टिः अच्युता अनिर्गताः शराः लक्ष्यमंगश्चेति विरोधाभासः २५ मारेति· उमे शंकरस्यारांदिप्यादृष्यादिसन्वयः कीदृशी मारारिः शंभुः शक्रइंद्रः रामो व
लभद्रः इभमुखो गणेशः एतैः आसारं हस्ताधारासंपातनतुल्यवेगेन सारं उत्कृष्टं आरब्धस्तवस्तोत्रं यस्याः सा अत एव नित्यं तेषां मारादिहरणक्षमा· आ
नतानां जनानां माता· संघट्टेन लोकविमर्दनश्रीः संपत्तिर्येषां तादृशानां महिषासुरप्रभृतीनां नानाविधितः संभ्रमसंरंभो यया सा यद्वा श्रियां संघट्टः संमे

लनस्थानं न्वाधितः संभ्रमउद्वेगो पस्या इत्यर्थः । मान्या । रमा णां स्त्रीमां आ दृष्टिः आदि मा पुरा तनीः अद्विजेति वा पाठः ॥ अयं खङ्गवंधः २६ सरलेति । प्र
क्रांत वर्णनाशारदत्र विशेष्यते । सरला मेघादि कौटिल्यरहिता । वृहल्लैशरभैस्तरलानां अलिवलानां भ्रमरसैन्यानामारवः कोलाहलो पस्यां सा । वारला
हंसो वहुलापस्यांता भिर्वावहुला । अमंदा उद्युक्ताः करलांतिस्म हूंतीति करला रतानो पस्यां सा । अवृहलेषु कूपहेषु अमलात ताहगात्रिर्मला वाः अ
पं मुरजवंधः २७ भातनइति हे प्रतिभासा रभ्रजपाश्रेष्ठ राजन् तेतवसभाभासतं । कीदृशी रसेनाभाता शोभिनाराति केत्यर्थः अहता अपतिहता विभा
दीप्तिर्यस्याः सा । भाविताः श्रितिता आत्मा परमात्मा पया सा । वादे प्रभा निपुणा । अत एव देवाभा देवतुल्या च तहर्षे विस्मये वा । अयं पद्मवंधः २८ रसासारेति ।
हे रसासार पृथिवीश्रेष्ठ राजन् । रक्षतत्तव रसानु पृथिवी पुनः क्षतायान खंडितनशुभावहविधीनदुर्जनानस्यतिनाशयतीति क्षतायसा । धौतकर्मणीतिधात्व
नुसारात् तथा अतासा अनुपक्षयी अस्त । नमु उपक्षयेधातुः सा रसा पता सपश्या पतने त्रैति संबोधविशेषणं । तथा सातं नाशितमवातमत्ता तयेनताद्द
श । वा ते गीत्यर्थतया तातार्थत्वात् एवं तक्षंतनूकरणं शातिद्यतीति तक्षरः अतादृशः तक्षूतनूकरणे । अयं सर्वतोभद्रवंधः २९ अरिवधेति । अवनि
तलस्य तिलको भूषणं राजा सदानस्यासताभातस्या । सदा अनस्या क्षुद्रेषु नम्रतया वा भातीत्यन्वयः कीदृशः अरिवधदाईहा चेष्टायेषां तान् शारिताः श
त्रुकान पोधान् ईरयति प्रेरयतीति तथा । अरिवधदेहंशारीरमस्येति व्याख्यानमयुक्तं । तथा सति शरीरपदस्यपरिहृतिसहत्वेन देहपदस्य वदसहत्वेन
चोभयालंकारता पत्या शब्दमात्रालंकारो दाहरणतानुपपत्तिप्रसंगात् । सहसा शीघ्रं रयिभिः रथाद्दैः सप्रअंतर्गतं संवद्धमितिया वत्तुरगया दातं
यस्यसः क्षितिरत्नायां अगः पर्वतः । अत्र देहशरीर इत्यादि पुनरुक्तवदाभासो लंकारः ३० चकासतीति । शोभनमनसत्तस्य राज्ञः पार्श्ववार्तिनो विवुधाः पं

डितास्वकासतिशोभंते कीदृशाः अंगनासु रमंते इत्यंगनारामाविरहस्थाइत्यर्थः अंगने अजिरे आरामाः क्रीडावनानि येषामिति वा कौतुकमु
त्सवविशेषस्तद्रूपानंददाः कौतुकेन विवाहसूत्रेणापि आनंदत्तुत्ववइतिवाः ३१ नउद्वपुरिति अस्मो हरिः सिंहः अजयत्सः सर्वस्मिंहेषुश्रेष्ठभू
तइत्यर्थः कीदृशः नतुकृशं वपुर्यस्य सः करिकुंजराणां गजश्रेष्ठानां रुधिरेणारक्तालोहिताः खराः तीक्ष्णा नखा यस्य स तादृशः तेजसो धामस्थानं महः
सा बलेन पृथुमनसं विपुलांतः करणानामिंद्रः श्रेष्ठः जिष्णुर्जयशीलः अत्रापि तेनु वपुरित्यादौ पुनरुक्तवदाभासः स्पष्टइति श्रीमत्सदेवाकस्वमाराणामि
ज्ञातस्य द्रामभद्रात्मजवैद्यनाथस्य सूरिरचितायामुदाहरणचंद्रिकायां नवमउल्लासः लीलाकलितनीलाभ्रमनोहरकलेवरम् राधानयनसर्वस्वमाश्र
ये पदुनंदनम् १ स्वप्नेपीति प्रभाववत्प्रभवं उत्पत्तिहेतुं ताभिरसान्वयः कांतं कमनीयं यथैस्य नंतरं नमुंचती स्पनुबंधः २ चकितेति चकितत्रस्तः
एवंभूतायास्तस्याः एकांतनायिकायाः कुधिक्रोधे सति नरूणाहृत्तावज्ञाशङ्कुम हाहरिणीमनोहराराशीलाकांतिर्यस्येवंभूतं इदमाननं सरसिजं चस
मस्तिति संमदं हर्षं नायकश्चेतसि विधत्ते इति सखीप्रति सखीप्रोमाह्यं कयापि निवेद्यते २ अस्तापयतेरिति यो राजाचतुर्भिरूपायैः सामादिभिरदः एत
द्भुवनं वभार पालयामासेत्यन्वयः दोर्भिः स्नीहस्माः भुजैरित्यत्रापि चतुर्भिरितियोज्यं कीदृशैः अस्तापयतेर्दूरं दृश्यापयोजितैः आजानुलंबिभिस्ब दि
व्यैः श्रेष्ठैः दिविभवैश्चः प्रभाभिरुपलक्षितैः अनपायमपैरायापघ्नैः लक्ष्मीविलासस्थानत्वमुपायानां तत्संयोजकत्वाह्नीयं ३ अविंतयेति सकलम
नोरथमार्गस्य पादने पुत्र कृष्टगुणागरिमगिरीगीतानाम्नी यस्य सः कस्य नाभिलषणीयः स्पृहणीय इति संबंधः ४ गांभीर्येति रागाभुजंगः समुद्रस्तस्येवेत्य
र्थः तत्र गंभीरावेणीवार्यवृत्तिः निदाघेग्रीष्मकाले पदं वरत्नं स्फूर्यते नतु लंघितद्वत्तेन तु संक्रियाचेद्गतिरितितु सार्थवृत्तिः ५ धन्यस्येति अनन्यसामान्यः अ

८५

85

साधारणाद् इत्युत्कर्षविशेषणं · हेचेन त्वत्सप्तस्यवचःकरणोपमित्यन्वयः अमृतं पथ्येति अमृतवत्पारिणामसुरसमित्यर्थः ६ आकृष्टेति ·
करवालः खड्गः संपराये संग्रामे · अत्र क्रूरत्वादिकं परमसाधर्म्यं न त्वाकृष्टत्वादि · तस्य दंडायुधत्वेनैव प्रसिद्धेरिति · ७ करवालेति · आचार आच
रणं · विषश्च कल्पं · विषान्तर्विषसून्नेतमित्यर्थः ईषदसमाप्तौ कल्पपप्रत्ययः यदि जीवसि ततः तदा वेत्सितं अमीयाचरण्यानेन तव जीवनमेव दुर्लभ
मिति भावः ८ सत्यलेति · सकलकरणापरविश्रामश्री/वितरणं न सरस काव्यस्य · दृश्यतेऽथवा निशम्यते सदृशं अंशांशमात्रेणोतिसं · सरसका
व्यस्य अंशांशमात्रेणापि सदृशं न दृश्यते अथवा निशम्यते श्रूयत इत्यन्वयः कीदृशं सकलकरणानामिन्द्रियाणां परमविश्रान्तिलक्ष्मीदायकं · व
थाच सरसकाव्यमेवैवंविधं नान्यदिति भावः ९ नतेति · गौर इव पाण्डुर्गौरपाण्डुः उपमानानि सामान्यवचनैरिति समासः · माहेंडीदिक् प्राची १० असि
नेति · प्रतिभटानां शत्रूणां विक्रमस्य दर्शने सत्यपि यन्न पईदृशा आसीदित्यन्वयः असिः खड्ग एव यत्र मसिपत्रं · रूढरूढिकपारभसोत्कंठया आहितः छ
नश्छिन्ने तूर्णे शीघ्रं चारः संचारो यस्य सः उत्कया अरुणा कपोलकान्तिर्यस्य स नादृशः ११ पौरमिति · असौ नृपः पौरं जनं सुतमिवाचरति · उपमानादा
चारे इति कर्मभूतादुपमानात्क्यच · समरस्यान्तरे मध्ये अन्तःपुरीयति अन्तःपुर इवाचरति · अत्राधिकरणाच्चेत्यनेन क्यच · विचित्रेत्यादि · विचित्रेण
चरित्रेण विज्ञ इत्यर्थः तेन विज्ञप्तं चुप्रचणाया विश्वचुप्रसनात् · नारीयत इति नारीवाचरतीत्यर्थः कर्तुः क्यङ् सलोपश्चेत्यनेन क्यङ् · १२ मृध
इति · मृधे संग्रामे · निदाघे स्यादिति निदाघघर्माम्भु मिव पश्यन्तीत्यर्थः उपमाने कर्मणि चेति कर्मण्युपपदे णमुल् · चकारात्कार्थे सदारमित्यत्र कर्त
रि · पार्थ इव संचरतीत्यर्थान् उभयत्रानुप्रासनिकोपपदविध्यनुप्रयोगः १३ मविनेति · मनसिशुखवडः सामगं वशीकृते सति यथाक्रमं सविताद्दि

ए म०
८५

कं विध्यादिवदाभरती त्यर्थः सर्वप्राणिप्रदिकेभ्यः किंशवा वक्रव्यइत्याचारे क्विए· १४ परिपंथीति· परिपंथिनां शत्रूणां मनोराज्यं स्य मनोरथः
राजकुंजरइतिकुंसुमस्य दर्शं भ्रमरभ्रमं न प्राप्यसीति संदुदुमिति शब्दं कुर्वाणो त्यर्थ इति के चिन् तन्मनेवता तिभ्रमत्रित्यन्वयः दुंदुल्लं तमभ्रम
णो त्यर्थ इत्यन्ये १६ अराती ति· वैरिविक्रमालोकनेन विकासशालिनेत्रः कृपाणो न उदग्र दृढो दोर्दंडो यस्य दशाननृपः सहस्रमायुधानि यस्य
तमपि वा त्मानमाचरति मथा तं दुर्जयं मन्यते तथात्मानमपीत्यर्थः आयुधसहस्रकृत्यं स्पैकेन कृपाणेन निर्वहणादुत्कर्षः अत्र कर्मत्वेनोप
मेयस्यात्मत्वनैवानुपादानं गोप्यं केचित्तु उपमेयोपादानं प्रसंगं मयात्सहस्रेत्सेकपदं तयाआचक्षते· सहस्रेणायुधैः सहवर्तत इति सस
हस्रायुधश्च इति· अन्ये तु सहस्रा रायुधीत्यपपठन् सहस्रास्यं चक्रमायुधमस्येति तदर्थः १७ तरूणीमनीति तरुणीमनिःस्रतिमनोहरती ति सं
बंधः तरूणीमनि विषये कृतमवलोकनं पश्येति वा· तेन वयःसेधिलाभः ललितविलासेभ्यो विलक्ष्यदत्तो विग्रहः। शरीरं यया सा विसरःसमह
त्तेनाविर्भूतं यास्यं आंतरं मनोपस्था· सा· विशारसतेति पाठे शरैर्विशीर्णान्तं तरं यस्याइत्यर्थः १८ अनयेनेति· साप्रकृतनापिका विषादेतम
स्रोम्लानिं प्राप्तवती· अनयादिनाराज्यलक्ष्म्यादिरिवेतिमालोपमा· अनयोत्रीति विरहः- १९ ज्योत्स्नेवेति· समाकृष्टाः वशीकृताः अत्र ज्योत्स्ना
दिनिरूपितं नयनानंदत्वादिसाधर्म्यं भिन्नमितिभेदः २० अनवरतेति· हे राजन् अनवरतं कनकस्य वितरणे ये जललवास्तैर्मलिनेपूर्णोकरे त
रंगिताननरंगवजश्रेणीभूयपूर्वपश्चाद्भावेन संततमिलिता अर्थिनां ततिः पंक्तिर्यस्य तादृशस्य तव मसादिः मणिस्मादिव दतिविमलेति पूर्वपूर्व
स्योत्तरोत्तरमुपमानत्वाद्रसनोपमा· मणीतिरूक्ति सर्वत्रविमलत्वमेकं साधर्म्यं २१ मतिरिति· तस्य नृपस्य मूर्त्यादिर्मसादिवन्माधुर्यादिमतीस्य

८६

न्वयः प्रभावचिता प्रभावव्याप्ताः परेषां जेतुं न शक्यैस्तन्वयः अत्र मधुरत्वादिसाधर्म्यमित्रं २२ न केवलमिति। एवकारो भिन्नक्रमः स्मा नितं वि
न्येव केवलं नितं विनीवनितां तत्कांतिभांतीति न यावत् अपि त्विसर्थः तेऽत्र नु मवैकगोचरा स्तस्या विलासास्तद्विलासाः इवभांतीति वचनविप
रिणामेनान्वयः कीदृशाः विलासाः प्रथमस्यकामस्य लासो नर्तनं तस्य वासा निवासभूताः नितं विनी सैव नितं विनी वनन्या त्र नितं विनी सदृशी
ति वार्थः तेन स्फुरत्तपाम्यतैये कालाभः एवं च तत्रैव तदुपमानान्वेतीस्तनन्वयोऽलंकारस्तस्य लं च निरूपमत्वबोधः २३ कमला लक्ष्मीः वि
भा कांतिः धृतिर्धैर्यं वत्तहर्षे यस्य राज्ञो मतिः कमलादिकमस्यान्यस्य दृशं विभातीति निर्गलितान्वयः सेयं तृतीयसदृशाप्यवच्छेदफला उपमेयो
पमा २४ उन्मेषयमिति। हे ललिततनुपद्मलक्ष्मीः मन्ये इति हर्षात्तवपादयोर्लक्ष्मीनिसंबंधः तेन हर्षरूपहेतूत्प्रेक्षेयं। इति किं। योममय — ल
क्ष्म्या जाति वैरी सहजशत्रुर्निशायामुन्मेषमुदयं न सहते तत्स्वयं दोःसौंदर्यदर्पः अनयाइंदीवरदलदृष्टाकर्तृभूतया वक्रकांसाकरणभूतयाप्र
समेव लावण्यकांतिर्नीतइति २५ लिंपतीति। गाढांधकारवर्गानमिदं। तमः कर्तृ अंगानि लिंपतीवेति व्यापनस्य लेपनत्वेनोत्प्रेक्षा। एवं नमः कर्तृ
कां जनदृष्टिं त्वेनापीति २६ अयमिति। हे राजन् त्वामाजौ रणे चिरं निपुणं समालोक्य प्रतिभटाः शत्रवः इति विकल्पानुसंशयान्न विदधति कं
र्वंतीत्यन्वयः चिरं विदधतीति वा। तिरइति पाठे तिर्यगित्यर्थः तेन त्रासध्वनं इति कीदृक् तत्राह अयमपि स्यादि। इत्ते प्रकः एषकृशानुः निय
तं निश्चितं सर्वदिशोन प्रसरतीत्येव वैधर्म्योक्तिः यदि रितो मा तेर्डित्वादि संशयः २७ इडुरिति। अत्र इति पाकृसंश्लिष्टमिति पूर्वार्द्धे शेषो बोध्यः।
ललितानि च तानि सविलासानि चेति विग्रहः। परतः पश्चात् २८ अस्या इति चिक्रमोर्वशी येउर्वशी प्रकृत्युपहारवरदयमुक्तिः अस्याः सर्ग

रा.म.
८६

विशेषः । व्रतापतिरभूत्कांतिमदर्श्वं द्रो३स्येवं चंद्रत्वादिकोटिकः संशयः पुष्पाकरोमासो मधुमासः । संदेहेकारणमाह वेदेत्यादि । विषयेभ्यो
व्यावृत्तं कौतूहलं यस्य स सश्रुराणो मुनिर्ब्रह्मा । इदं रूपं कथं नु निर्मातुं प्रभवेदिति सन्देहः । तथा च साधारणस्वरूपसंभवात्संदेह इति भावः । २९ त्वो
त्तेनेति । इयं रात्रिरेव कापालिकी योगिनीति प्रधानरूपकं । एतन्निर्वाहकान्यपराणि । चंद्ररूपे मुद्राकपालेन तल्लांछनस्वच्छलेन सितद्वांजनसपरिम
लं चूर्णं दधती धारयंती । दीक्षाकाल गृहीतोपकरणो मुद्रोपदर्शनाद्याया त्वं द्रा नांमवहा इति चंडीदासः । मुद्रापरिमलशब्दो प्रशंसार्थो वित्तस्ते मुद्रा
। चिह्नं तद्रूपे कपाल इति वा ज्यो त्स्नारूपेणामस्तनाच्छुरणापंगलेयत्तेन धवला । तारकारूपाण्यस्थीनि विभ्रत द्रुनिस्यव्यसने कौतुके रसिकेति ३० ज
स्येति । यस्य रणात्तः पुरे कुरे कुर्वतो मंडलाग्रलतां । रसं मुग्धपि सहसा परान्मुखीभवति रिपुसेनेति स । मंडलाग्रलतां खड्गलतां करे कुर्वतो धार
यतः युद्धार्थं रतार्थं च । अतः पुरत्वाद्येयसामर्थ्यान्हाताशानापि कालावगमात् । रसनवीररसेन श्रृंगारेण च संमुखी पुरुषः । रिरंसुः परान्मुखी भव
ति भयाद्व्रान्निवर्त्तते । कोमतन्निपसंगमाच्च ३१ कुरंगीति । यत्तयस्मात्तगीन ध्वनिषु स तु स्रंगानिलिमतयति निस्वेण निकरोति । तथास्कतमपिका
तस्येदं तं वृत्तांतं सः स्वी प्रतिपुनः पुंस्त्वविषयं करोति । यस्माच्चानिद्रे नेत्रमुद्रणादि भूमंपयणास्या तथाश्चं ततः स्वपिति । कांतेकृतानां ततः कारणात्तयावि
षयात्रगृह्णानिश्चहो इति । संबोधने हे सखि तत्तस्मान्मनसिजः अस्याहृदि उद्भूतामिति शेषः । अभिनवां प्रेमरूपां लतिकां सेक्तुं प्रवृत्त इति वेद्यो सन्वयः अभि
नवेति सेको चिस्सूचनं ३२ सौंदर्यस्येति । तरंगिणीनदी । सौंदर्यस्य तरंगत्वावगमेनोत्तरोत्तरविच्छेदलाभः । हर्षोद्गमश्च यौवनस्यानलाभात् । कार्मणक
र्म । वशीकरणं । नर्मरहसां । क्रीडारहस्यानां उल्लासनायाविततमणास्वा सत्वाने चक्रो क्रीनां विधाशिलाशास्त्रं । विधेर्ब्रह्मणो निर्माणविधिनिपुणतातापाः सा

८१

४७

क्षात्कारः साक्षिये तेषु कस्यां त्रिपथगां वहन्तां मारोपात् नमालारूपकं मंचशिलीमुखः कामः ३३ विद्वदिति हे वरवीरप्रभो त्वं वैरिचं द्राङ्गं वक्षर
शातं उच्चैः साम्राज्यं क्रियाः स्वाख्यातपदं कीदृश विडंबमानः समेवमानः संसारस्तत्र हंसरूपेति हंसत्वारोपे स्नेषवलान्मनसिसरो विरोधारो
पस्य हेतुत्वात्स्वरूपितरूपकं एवमग्रेपि क्वचिद् कमलापाः संकोचः एवं कमलानामसंकोचस्ते नदीमधुते सूर्य दुर्गाणां समार्गणामेव दुर्गयामा
र्गणामन्वेषणां तेन नीललोहितशिवः समितां संग्रामात्तां स्वीकारः एवसमिधां स्वीकारस्तेन वह्निः सत्येप्रीतिरेव सत्यां दक्षकन्यायामप्रीतिस्तद्वधा
नेकुशलपवदक्षप्रजापतिरूपाविजयः पररामवरावविजयोर्जुनस्तस्याभावः आकुसत्वं अग्रजत्वं च तेन भीमभीषणाभीमसेनश्चेति ३४
श्चालानमिति अयएवकुंजरोहस्ती तस्यालानं बंधनस्तंभ इति भुजे आलानत्वारोपे जयेकुंजरत्वारोपो हेतुः एवमग्रेपि विपद्रूपस्य वारिधेः पाषा
णसेतुः तत्राणसमत्वात् करवालः खड्ग एव चंडमहाः सूर्यस्तस्य पूर्वाद्रिरुदयाचलः ॥ लीलास्य हस्यो स्ववस्यालोको दर्शनं तेन प्रकाशितं जगत्त्र
यं येनेति राजपक्षे मुक्तामणिपक्षे तु महालोको महादीप्तिः सहंशो महाकुलमेव महावेणुस्तत्र मुक्तारत्नं वंशोद्भवमुक्तायावर्ज मूल्यत्वाद्धत्त्वो
क्तिः भवान् केनेंत्सप्तत इत्यन्वयः सप्तसप्त इत्यपपाठः पुष्पधुपपद इत्यत्रार्थग्रहणाभावात् ३६ निरवधीति सप्रथमआद्यः कूर्ममूर्तिर्भवानजा
यतीति विष्णुप्रतिमक्तोक्तिः यस्यास्थितं स्थितिः निरवधिकालपरिच्छेदशून्यं सर्वाधः स्थितत्वाद्वा प्रथमत्वं च अत एव अनिवर्त्तितः कौतुकस्या
श्चर्यस्य प्रपंचो विस्तारो येन तत् कीदृशः कूर्ममूर्तिः चतुर्दशलोकरूपायावल्लेः कंदभूतः ३७ किसलयेति मदनः कामिनां मनोजयतीत्यन्वयः केन
तत्राह किसलयेत्यादि लतानां पल्लवरूपैः करैः करकमलैर्मुखेंदुभिरित्युपचाविपो नामन्वयः अत्र पूर्वमारोप्यमाणस्य करादेरूनत्वारो

रा म
८१

पविषयत्वाद्दर्शनाद्रूपकं ३८ आवामइति · परिणतरुचः पूर्णकांतेः शशांकस्य नतत्वेन पराभिमतस्येव पुष्पिशागलग्नं प्रकटतां प्राप्तोपंकलं
कोनैव विलसतीत्यपह्नुतिः नहि किं तत्राह · अमुष्यचंद्रस्य विगलदमृतप्रवाहशीतलेउरसिगाढं रतिश्रांताइयं रजनिरूपा रमणी शेतइति
मन्येइति ३९ वनेति · वनस्थेदे · अस्मिन् · मादृशेरागिलोके अनुरक्तजने किंयत आपरिमितं एतद्वैरं अत्यतिशेषः यस्येति तथा · हीसनं तदपोज्झ · उपव
नेषु सहकारआम्रास्तेषूद्भासितो भृंगाभ्रमरास्तद्ध्यानेन प्रतिवारणमनेनस्मरेण कालकूटमुद्विकितं प्रकाशितं लापितमितियावत् ४० अमुष्मिन्नि
ति · शार्वेण हरेण दग्धो दग्धः स्मरः लावण्यरूपामृतसरोवरभूते मृगदृशो मुग्धिन्नमहति जघनप्रदेशे नूनं निपतितः · यस्यकामस्यांगान्येवांगारा
स्तेषां प्रशमस्य निर्वाणतायाः पिशुनासूचिका इयं धूमस्य शिखा नाभिविवरे रोमावलिमूर्तिः परिणमति नैष रोमावलिः किंतु धूमशिखैवेयं तदा
कारेण परिणतेत्यर्थगम्यापह्नुतेरुदाहरणं द्वयं दर्शितं ४१ उदयमिति · विभाकरनामाराजविशेषः सूर्यश्च · उदयं उदयाचलं · समृद्धिं च · अ
यते प्राप्नोतीति · दिशां मालिन्यं अंधकारः तन्नद्विमानदुष्टसामंतानामुपद्रवश्च · दिगागतजनानां दारिद्र्यदौर्गत्यं च विधातस्मै · निद्रामुद्रा मुद्रणां चक्षुषः निद्रा
मुद्रा निद्रासदृशी अवस्थाआलस्यरूपा च · निधनं · नाशं · क्रियाअग्निहोत्राद्याः पक्षद्वयेपि · स्वैराचारप्रवर्त्तनं अभिसारादिः विधिनिषेधातिक्रम
श्च तत्खंडनं निहंति रचयति · हर्षातिशयादुत्तववनेनेति द्विरुक्तिः तेजः पुंजो रश्मिसमूहः कांतिसमूहश्चेति श्लेषालंकारः ४२ लहितुरोति · लब्धातव
बाहुस्पर्शो यस्याः सकोप्युल्लासः जयलक्ष्मीस्तवविरहेन खलूज्ज्वलाद्दुर्बलानद्युत्तेतिसं · अत्र बाहुस्पर्शलाभप्रयुक्तोल्लासादिसाधारणविशेषण
बलाज्जयलक्ष्मीवृत्तांतो नायिकावृत्तांतरूपतयागम्यत इति समासोक्तिरलंकारः ४३ घस्त्रैर्येति · स्पष्टं अत्रोडुपेन सागरं तरणवत् मदीयमत्यास्य

उ ५

यं वंशवर्त्तिनमसंभावितमित्युपमायाः पर्यवसानान्निदर्शनालंकारः ४४ उदयतीति· मायेरैवतकवर्णनं· विततामिस्ततादूर्ध्वं रश्मय एव रज्जवो
यस्य तादृशे अहिमरुचौ सूर्ये उदयति सति हिमधाम्नि चंद्रे चास्तं याति सत्ययं रैवतकगिरिरुभयतो विलंबिघंटाद्वयपरिवारितस्य वारणेंद्रस्य
गजश्रेष्ठस्य लीलाशोभां वहतीत्यन्वयः अत्रान्यलीलायाश्चान्यत्रारोपः लीलासदृशीं लीलामित्युपमां गमयति· तत्र चंद्रसूर्ययोर्घंटयोश्च बिंबप्रति
बिंबभावस्तत्समर्थनाय च रश्मिषु रज्जुत्वारोप इति बोध्यं ४५ दोर्मूलमिति· तरंगवती भुजंगः समुद्रः सलिलं घयति पिबति लंघयितुमिच्छति· दोर्मूलं सागरत
रणादिव तत्वक्रुणाभावरामशक्यमित्यनेकोपमाकल्पनान्मालारूपेयं निदर्शना ४६ उन्नतमिति· दृषत्कणाः पाषाणकणाः चारूणां मंदेनापि मारु
तेन धुताः कंपिताः अधः पतंति· किं कुर्वन् यो लघुः स उन्नतं पदमवाप्य हेलयैव पतेदिति· कंपिताः अधः पतुवन् स्वदृष्टांतेन कथयन्· उन्नतं पदमु
त्कर्षः धुं उच्चस्थलं च· लघुरल्पबुद्धिः अल्पपरिमाणश्च· पतनमुत्कर्षहानिः अधः संयोगश्च ४७ यातानिति· याताः प्रस्थिताः किं पुनर्नमिलंसयितुमि
लंसे वेति काकुः मत्कृते मदर्थं अतिकार्श्यं दर्शनादनिष्टाशंकया सवाष्पत्वं· मदीयागमनानिच्छा ज्ञातेति लज्जया मंथरा स्तब्धा तारकाकनीनिका
यस्य तेन तथा निपततपीतमशकुनं भयात्संहृतमक्षपेन तादृशेन चक्षुषा· हसितेनेति· एवं किलास्याभिप्रायो यदियं मद्विरहे प्राणान् धारयिष्यतीति
प्रहासरूपेणोत्यर्थः भाविनि आवश्यके मरणे उत्साहः· स चायियोगदुःखशांति वांछयेति ज्ञेयं इयं च प्रस्थाननिरुद्धिरूपे कार्ये प्रस्तुते कारणोक्तिरूपाऽ
प्रस्तुतप्रशंसा ४८ राजन्निति· राज्ञः शत्रुभूतस्य शुकः तवअरिभवने शून्यायां वलभौ मिलितो चित्रस्थानवलोक्य एकैकं प्रतीत्यमाभाषतइत्यन्वयः· की
दृक्कुतत्राह राजन्निसादि कुत्रेइति नादृष्णा भोजिकायाः संबोधनं कुमारसहितैः सचिवैरथापि किं न भुज्यत इति काकुः· अत्र शत्रुपलायनेकारणे प्रस्तु

रा.म.
८८

नेतत्कार्यवचरूपा ४९ [ ]तदिति · कस्यचिन्मूर्खस्य तृष्णां तं कुतश्चिदाकर्ण्य विस्मयेन मामपसारां कं चित्प्रति कस्यचिदुक्तिरियं · मुग्धादिसनंततरं
श्रुतमिति शेषः तस्य मुखात् श्रुतमेतत् लिपयत् अल्पमित्यर्थः । अपायेवापं चमीमुखादयगतमित्यर्थः किं तदित्याह · सजडो मूर्खः कमलिनीपत्रे
स्थितं वारि गाः कणां बिंदुं मुक्तामणिरित्यमंस्तेति यत् · अस्मादन्यदपि मरणे शानेतादीयमानेन यत्य मारोकरोअगुरुस्य ग्रस्यलघुक्तिपपा अल्पचेष्टया
म विलपितिलीनेसति मममुक्तामणिः क्कचोड्डीयगतइत्येवं नःशोकेन न निद्रातीति अत्र जडसामान्यप्रस्तावे तद्विशेषाभिधानरूपा ५० सुहृदिति · श्री
कृष्णेन नरकासुरे हते तत्सुहृदं प्रति तन्मंत्रिराज्ञ उपयुक्तिः · प्रतिपातनं प्रतिक्रिया · भाजनं पात्रं · अत्र विशेषप्रस्तुते सामान्याभिधानरूपा ५१ पुंस्त्वादिति ·
प्रणायने इति सप्तमी · अत्र पुरुषोत्तमेन विस्मृतादेस्य मोहने स्त्रीरूपतापस्तावराहमूर्त्तौ पातालप्रवेशरूपाधोगमनेन · बलिः प्रणयने प्रार्थने याम
नतां प्राप्तश्च भुवनाक्षयणादेवं प्रकारेणापि विष्णोर्दूरतां कर्त्तव्यमिति दिक् मार्गः प्रकटितः इत्यप्रस्तुतस्योपमानभूतस्य विष्णोरभिधानात्तत्तुल्यप्रकृतपु
रुषश्लेषप्रतीतिः तत्र च पुंस्त्वात् अचलनं पुरुषार्थहानिः अधोपातं स्वपदभ्रंशः अमहत्त्वं गौरवहानिः विघ्नं सर्वजनमित्यर्थो बोध्यः · प्रणयने नापूर्वोक्त
र्थं प्राप्त्या महान् त्रिविक्रमतया महाकायः उच्चपदस्थाश्चेत्यर्थ इति चंडीदासः ५२ येनेति · क्रांतिं गमितः प्रापितोसीत्यन्वयः क्रांतिर्निष्क्रमता · तत्र खेवि
षये पादो रश्मिश्चरणाश्च पुनरिति त्वर्थे · एतत्पादग्रहणं · मनाक् ईषत् · जडधाम तामसीतलप्रभता · पक्षे माचप्राधान्यात् मूर्खत्वाप्रमदता · विस्फूर्जसे सग
र्वं मुदेत्यर्थः ५३ आदायेति · मुखं वदनं · नदीसंगमस्थानं च · दुर्वर्णं वैन · दुष्टेनार्णवेन · वडवादहने वडवानले पातालमेव कुक्षिः कुहरमिति विग्रहः अ
न्यापव्ययकारिपुरुषप्रतीतिः ५४ अर्धैरिति · अर्णो जलं तेन स्थगितं आच्छादितः भुवनाभोगस्य पातालरूपः कुक्षिर्येनेति विग्रहः · पोत उपायः साधनं

८९

येषां ते तादृशाः पुरुषाः मदीयस्य र्थे अहो इत्याश्चर्यं कथमपीत्यस्य कल्पइति य अवहितेनाचपः अवटो गर्त्तः कुहरं तस्येव गंभीरप्रदेशस्तदवलोकनेपिको
नाम कथमपि कस्य समर्थः स्यादित्यर्थः लंघनस्य के वक्तव्ये त्यपिशब्दार्थः अत्र प्रभोः पूर्णत्वमेव वर्णनविशिष्टत्वमिति तुल्यप्रतीतिः ५५ कल्पमिति शाखो
टकं भूतानां वा सहस्त्रविशेषं प्रतिकस्यचित्प्रश्नः कथयामीत्यादि तस्यप्रतिवचनं वैराग्येत्यादि पुनः पूर्वस्य प्रश्नः वक्षि वदसि साधिति पुनस्तदेव वचनं कस्मादिद
मिति पुनः पूर्वस्य प्रश्नः इदं वैराग्यं कथंतदुत्तरं पुनः शाखोटकोक्तिः वामेन वाममार्गेन लक्षितः प्रतिकूलाचरणेन यः सर्वात्मनाछायोपसेवनादि
ना शाखोटकछायानाश्रयणोभूतानां वा सत्वं हेतुः मार्गस्था सदाचारस्थेति अत्रेप्रतीयमानपुरुषाध्यारोपेण शाखोटकस्य संबोध्यत्वादिसंगतिः ५६ सोऽ
पूर्वं इति रसनाविपर्ययः अग्निशापात्करिणां जिह्वापरिवृत्तिः अन्यत्र पूर्वविपरीताभिधानं कर्णचापल्यं निरंतरचपलता परवचनवपनार्थत्वं च मदः करि
णां प्रसिद्धोर्गवैश्च तेनविस्मृतास्वपरयो दिक्मार्गआप्तानामविभागस्य यपातादृक्षिः वारणो गजः वारकश्च अंतर्मध्ये शून्यः सांद्रः घनः रहितश्च करः शुंडाह
स्तश्च ग्रह आग्रहः अत्र प्रतीयमानपुरुषाध्यारोपेण मदरसनाविपर्ययोर्भमरस्य गजस्येव नेहेतुत्वसंगतिः ५७ कमलमिति अनंभसि अनुदके सकु
मारमृद्वी वा सौ सुंदरी अत्र कमलकुवलयकनकलतिकापदैर्मुखनेत्रकामिनीनां कमलत्वादिना ऽध्यवसानादतिशयोक्तिः ५८ अस्य मिति लउहृश
दः सो कुमार्यदेशी अन्यत्सोकुमार्यमस्यैव काप्यविवर्त्तनछायायाः प्रमासामान्यप्रजायते रेरेवेव न भवतीति सः वर्त्तते जीवतीति वर्त्तनं शरीरं तस्यछायाकां
तिः श्यामा षोडशवर्षा स्त्री सामान्यः सर्वसाधारणा रेरेवेवेति निर्माणपरिपाटीरेखामात्रेणापि नास्तीति भावः इयमस्यत्व वर्णनरूपातिशयोक्तिः ५९
राकायमिति राका पूर्णचंद्रा पूर्णिमा साम्यमेवपराभवः अपकर्षः एषा पर्यायोक्तिः ६० हृदयमिति मालती नाम्नी काचिन्नायिका अधिष्ठि
तमाक्रांतं चरमं पश्चिमं लोचनविषयं भजतां तद्दोवरतां प्राप्तवता त्वयाधिष्ठितापि ना परिवारसाधारणाद्रूपोर्वीकार्थपारनैचित्यरूपएक

राम ८९

एवसाधास्याधर्मः कथं न खल्विति भिन्नशब्दापादनमिति प्रतिवस्तूपमालंकारः ६२ यदीति मसृणमेवाख्यातं ॥ त्वपीति तन्न वीति । शाम्यति । अत्र
मनः कुमुदयोर्विकासनिर्वासनयोश्च बिंबप्रतिबिंबभावेन दृष्टान्तालंकारः ६३ नवेति साहकर्मणा शर्म सुखमस्येति विग्रहः कृपाणां तिकं ख
ड्गसमीपं आनिनीषतः नेतुमिच्छतः न तु नीतवतस्तथा हवे रणे परेषां शत्रूणां भूपयोद्धारः विशरारुतां विशीर्णतां अगुः प्रापुः विशरारुतां अहिंस
कतामित्यन्ये । हिपतः अवाते । वातशून्यदेशे इति वैधर्म्यदृष्टान्तः ग्लानेन तु न दधतीति व्यतिरेके साधर्म्यपर्यवसानात् ६४ किवणीति । कृपणानां धनं नागानां
फणामणिः केसराणि सिंहानां लघालिकानां कुन्तलाः कुतः स्पर्शं ते अमृतानामिति सं० केसराणि स्कंधलोमानि कुलपालिकानां कुलवधूनां अमृ
तानामिति सकलपक्षांत विशेषणं । अत्र वर्ण्यत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेनाप्रकृतानामन्येषां च कुतः स्पर्शं न इति सकृद्धर्मोपा
दानाद्दीपकालंकारः ६५ स्निह्यतीति । नवोढावधूः शयने तल्पे खेदं भजते । कूणतीति संकोचमालंबते । सचितं कवीक्षत इति चंडीदासः वेल्लतीति परिवृ
त्य शेते । विवलति । विशेषश्चंचला भवति । निमिषतीति निद्राव्याजेन नेत्रे मुद्रयति अंतर्नंदतीति हृष्यति नवोढात्वेन वाच्यतो हर्षाप्रकाशनात् अतएव चुंबि
तुमिच्छति न तु चुंबतीत्यनेकासु क्रियासु वधूरूपकर्तृकारकस्यैकवृत्तिः ६६ संख्यामेति समन्वेव्याख्यातं अत्र कोदंडादिभिः पूर्वपूर्वैरुत्तरोत्तरेषामासाद
नेन लोकत्रयव्यापिकीर्तिर्लाभानुकूल्यरूपोपकारस्यापादनान्मालादीपकम् पांडुरिति । समन्मेव्याख्यातं । अत्र प्रकृतानामेव वदनादीनामावेदनाख्य
एकोधर्म इति तुल्ययोगितालंकारः ॥ कुमुदेति ॥ नीलं च तत्सरोजं च तेषामालिः पंक्तिरिति विग्रहः काकः पदार्थ इत्यर्थः आनन्दस्य तत्र पुर इत्यनुषंगः
एकपदे युगपत् । अत्र कामिनीनयनाननोपमानत्वेनाप्रकृतानामेव कुमुदादीनां पूर्वार्द्धे कायदशोत्पादनाक्षेपउत्तरार्द्धे प्रतिहतत्वं चैको धर्म उक्त इ

सपरोभेदः ६७ सीताइति विरमे सत्यमानादि निशेषः॥ यातं गतं प्रोवतं त्विस्वन्वयः अनिवर्त्ति अपरावृत्तिशीलं· अत्रयौवनस्यास्थिरताया
मुपमानाच्चन्द्रादाधिक्यमिति व्यतिरेकालंकारः ६८ असीति· प्रभूताव हवश्च ते रिपश्च तेषां परामवे सति· स्मयो गर्वः ६९ इयमिति। दासीकृताना
मरसस्त्रानामकांचनस्य श्रीर्यनंसानन विशेषणं· स्मृतंतामरसंपद्मतामकांचनयोरपीतिशेषः ७० जितेद्विपेति· अञ्जवनकमलस्येव·गु
णाः पांडित्यादयस्ते न वश्च· ७१ अखंडेति· मंडलं राष्ट्रं· विवव· श्री संपत· शोभा च· कला कौशल· चंद्रपक्षे उ शांशश्च· जातु· कदाचित्· ७२ हरवदि
ति हे विभो हरवत विषमदृष्टिः कदाचिन्नासी सधचपः विषमदृष्टिस्त्रिलोचनः· सर्वाननुकूलदृष्टिश्च· विधूतः क्षिप्तो वितत्तो दक्षयज्ञ विशेषः ध
र्मश्च· करो राजग्रास्वधने· किरणाश्च· तापिता उद्वेजिता· संतापिता च· भूर्भूमिः तद्वाजनश्च· अपमाला रूपो व्यतिरेकः ७३ निसादितेति· प्रतापः
पराक्रमप्रकृष्टतापश्च· भास्वतादीप्तिमता भास्वान् सूर्यः ७४ स्वच्छेति· आननपक्षे स्वच्छस्वरूपता व्यग्रतोन समुल्लसितं स्मितं रविविवमितिरूप
कं विवप्रभो। धरोपत्र ताद्दशं· मधुपक्षे स्वच्छा त्मता ग्रणां नसमुल्लीसतं प्रतिबिंबितं इंदुबिंबयत्र तादृशं आननपक्षे व्ययमेवार्थ इत्यन्ये विंवप्रभायाधा
रकं· जीर्णामधुनो रक्तत्वात्· यत्र नगर्या ७५ एएहीति· एएहिकिमपिकस्या अपिरुत्तेनिगृह्वं भणामि· अलमथवा अविचारितकार्यारंभकारिणी स्त्रिय
तां न भणिष्ये इति सं· एइत्यव्ययं सानुनयसंबोधने· एहि आगच्छ· एह्रिं वीतिपठे इदानीमपीत्यर्थः अथवेति पूर्वाक्षेपे अलं· न भणिष्यामीत्यर्थः खेदा
तिशयात्सुनरुक्तिः अलंव्यर्थमितिवा· अविचारितेति सुभावमनालेव्य अनुरागवर्द्धनपरे त्यर्थः अत्रविरहदुर्दशातिशयो वक्ष्यमाणां वक्रमशकान
पानिधि द्वादस्तीक्ष्याक्षेपालंकारः ७६ ज्योत्स्नेति· शीतांशुकांतइव श्चंद्रकांत इव· मृणालस्य वलयानि कंकणानि· अंतर्मनसं मानसात्म्यं तरे प्रभवनाम

कर्षेणास्फितवतात्वया हेतुभूतेन उत्सोत्सादयन्तस्यानापिकामाः स्फुलिंगोत्करस्य अग्निकणसमूहस्य व्यापारो दाहो तस्मात् दन्तं तस्मै तदर्थं भवंति आः इति
प्रकोपे ऽव्ययं· हंत विषादे अनेनोक्तेन किं न ब्रूमहे अति प्रसिद्धत्वादित्याशयः अयं मुक्तविषयो निषेधः ७७ कुसुमितेति· कुसुमानि संजातानि यासां ताः कु
सुमिताः। रुजं पीडां अधत्त धत्तवती· पर्यावर्त्तनेस्म· परावृत्य वर्त्ततेस्म· नलिनी प्रफुल्लाभिर्लहरीभिः नलिनीयं रपराभिर्वा· नलिनीति नायिकारूपे· अलो
लितापि· अचालितापि· अनाघातादि रूपकारणाभावे पि पीडादि रूपतत्कार्यकथनाद्विभावनालंकारः सो कुमार्यातिशयस्य प्रसिद्धहेतोर्विभावनात्
७८ निद्रेति· स्फुरत्वे· सूर्ये· भुजंगो नायकः अत्र सूर्योदयादिकारणसत्वेप्यालिंगनपरित्यागरूपकार्याभावोक्तेर्विशेषोक्तिः सा च तन्निमित्तस्यानुरागाति
शयस्यानुक्तेरनुक्तनिमित्ता· रतश्रमादक्षमत्वेनिमित्तमिति चंडीदासः ७९ कर्पूर इवेति· यात्किंत्वाणस्य मनसस्याकर्षकता कर्पूरस्यापीषद्दग्धस्य सौर
भातिशयादृष्टान्तत्वं· तथा च श्रीहर्षः भूमिष्ठोपि यापा भवता मनोभूश्चायेन चायेद्य न सारभावः निजां पदस्तोषदशामदेष्य संप्रसनेनाधिकवीर्यताजितेति·
इयं चावार्यवीर्यत्वरूपोक्तनिमित्ता· ८० स एक इति· त्रीणि जगंति भुवनानि अत्र तनुरहं रोपिवलाहरणे निमित्तमचिंत्यमित्यचिंत्यनिमित्तेति ८१ एक इति· हे
देव एकस्त्वं द्विषां विदुषां मृगीदृशां च चेतसि त्रिधा त्रिभिः प्रकारैर्वससि अत्र विषये चित्रमाश्चर्यमित्यन्वयः। किं कुर्वन्· शौर्यस्य प्रतापस्योष्मणा विनयेन
लीलया विलासेन च यथासंख्यं तापं संमदस्य हर्षस्य रसं रतिं च प्रथ्नन् इति प्रकारत्रयप्रदर्शनं· सोयं यथासंख्यालंकारः ८२ निजेनेति आवृतमाक्रांतं· एवका
रो ऽप्यर्थे सुंदरमपीत्यर्थः शशिभ्रमभ्रमपि शांखं पीतं पश्यतीत्यन्वयः अयं विशेषेण सामान्यसमर्थनरूपो ऽर्थान्तरन्यासः ८३ सुसितेति· सापमेवाख्यातं· अ
त्र घनासि वृषभपद इति सामान्येन पूर्वोक्तविशेषसमर्थनरूपः॥ गुणानामिति· दोरात्म्यात· अपराधात्· धुरि अनन्यसाध्यकार्यभारे· धुर्यत्वदृढ नस्समः सं

जातः किंणोघर्षणाद्व्रणाश्चिह्नं यस्य सततथापश्चात्त्रज् समासे तादृशः स्कंधो यस्य सगलिः कुत्सितगलो गौर्वलीवर्दः गलैर्बलादाकर्षं जितं प्रग्रहं पः पात
पतितस्य गलिरिति निष्कैचित · अत्रैवै धर्म्येणासामान्यसमर्थनं ८४ अहो इति · कश्चिदापन्नसुहृदं पतितदवस्थोचितमप्रियं वक्तुकामः खेदात्तिरश्यान्तस्व
जीवितं निंदति · हि · विषादे यत यस्मात् · एवं विधाप्रियस्य कदाप्यनुक्तत्वादहो इत्याश्चर्ये · तएव जगति धन्या इति निर्वंधः प्रणमव आपत्तिः अत्रैवैधर्म्ये
णा विशेषसमर्थनं ८५ अभिनवेति · हे सुभग विधिवशातो दैववशातः वियोगएव यविर्वज्रं तस्य पाते सति नूतनन लिन्यादिकं दावानलराशिरूपं भवती
ति शेषपूरणेनाचयः अत्र नलिनीत्यादिजातीनां दहनत्वजातसाविरोधस्य विरहोद्दीपकतयादहनत्वोपचारेण परिहारान्नदाभासोऽलंकारः ८६ धागिरपडति
· अनुनतिरूक्षत्वाभावः अवलो वलशून्यः अत्र गिरित्यादिजातीनामुक्षत्वाभावादिभिर्गुणैर्विरोधः राजगतोत्रस्यातिशयविवक्षयातस्य परिहारः एवमग्नि
मोदाहरणेपि विरोधतस्परिहारानूहनीयोपत्वभावस्य गुणत्वाभावादत्यार्थे नन्निति व्याख्यानं नतदसुक्त · चतुष्टयीशब्दानां प्रवृत्तिरिति । नयेन जा
तिशक्रियाद्रव्याणि त्रिकस्यैव गुणापदेनोपादानात अन्यथा भावादिविरोधस्यासंग्रहेणाविभागन्यूनत्वापत्तेरिति ८७ प्रेषणमिति । कंठपरिग्रहे पाश
णापिताग्रणायणालतातो · धाराधरः खड्गः तीक्ष्णात्तीक्ष्णाधारः परुषश्च · अनुरंजेयेजे अनुरक्तो भवति · लोहितश्च · स्नेहप्रीति · वेष्कणपंच प्राप्नोति
प्राप्नोति · संगरस्य युद्धस्य संगे सक्तं मनो येषां ते · पटलैः समूहैः प्रसाधनविधिर्भूषाविधिः कौतुकमिति क्रियाविशेषणं एतत्कौतुकमिति वा ८८
सजतीति · अवति · रक्षति · हेलया अनायासेन मोपि जनार्दनः अवसरवशाच्छफरो मत्स्यो जातः इति शेषः ८९ सततमिति · घटनासंपादनतेन
करिनाः करः भवति सततिसरोजवत्सुकुमाराजानातरतिशेषः ९० पेलवमिति · पेलवं कोमलं · सततत्वशब्दो पर्यायो · मलयतं चंदनं ९१

अर्कौ चेति · उद्दामैरुद्धतैर्दीप्यद्भिः पाथां शौर्द्दृटः यस्य भीमार्गणानां वा रणानां अनर्गले अविच्छिन्ने शान्ते तीक्ष्णोयतने सति नवांभोजदलव
दभिजातः कोमल अमृतसमार्णवः पारमुरामः अपूर्वः सर्गः सृष्टिर्यस्य पत्कर्मकोपत्कर्तृको वेति समभिसन्वयः ९२ पदीति · चतुर्थ्यामा
तं अयमिति · वार्गजलानां · निलयः स्थानं इति हेतोस्तस्माक्रांतमनांसि स्माभिर्जलनिधिः । श्रितआश्रितः मुनिरगस्त्यः एनं समुद्रं क्षरणा
दासमन्तात्सास्मति ददं कोजानीत इत्यन्वयः कीदृशं निजाकरपुटीकरसपुटं तदेवकोटरं विलंतदूतं · ताम्यंतः स्लायंतस्तिमयो मत्स्या मकरा
श्चयत्र तादृशं ९३ समदेति · हे क्षितितिलक त्वयि तटजुषि तीरगते सति · शंकरस्य चूडामस्तकं तदूता आपगा नदी गंगापि कालिंदीयमुना
भवति · कुतस्तत्राह समदेत्यादि · मत्तगजाः करिणस्तेषां मदजलनिष्यंद एव तरंगिणी नदी तस्याः संगात्संबंधात मदजलस्य श्यामवर्णीबंभ
सिद्धं ॥९४॥ पश्चादिति · शयनादुत्थितस्तुरंगोश्वः क्ष्मां भूमिं खुरेण विलिखति उत्किरतीत्यन्वयः अनवरतं चलत्प्रोथो नासिकापुटं यस्य
सः किं कृत्वेत्यत्राह पश्चादित्यादि अंघ्रीचरणौ · त्रिकस्य पृष्ठवंशाधोभागस्य नत्यानम्रतया विततं विस्तृतं अंगं ग्रीवाद्यपि दीर्घीकृत्य · आभु
ग्नो वक्रः कंठो यस्य तादृशो मुखमुरसि आसज्येति संबंधः सटा · स्कंधकेशावलिः पृष्ठवंशाधो त्रिकमित्यमरः प्रोथोश्वगोः घ्राणयामिति
विश्वः अत्राप्यजातिवर्णनात्स्वभावोक्तिरलंकारः ॥९५॥ हित्वेति · हे राजन् त्वां हित्वा परोन्यः उपरोधेनानुरोधेन वंध्यं भ्रूलं मनोपेक्षां तादृशानां
मौलिः श्रेष्ठो नास्तीति मन्ये तथा रमां लक्ष्मीं मलरेखां विना अन्यत्र लज्जापावर्जनमभावो नेसदृश्यत इत्यन्वयः कथं तत्राह य इत्यादि · यो भवान् मुखशा
ते हृपापशतैस्त्यागस्ते इत्यर्थः त्यागकृतमवमानं नप्राप्यापीति संबंधः इयं निंदापूर्विका व्याजस्तुतिः ९६ हे इति · हेलयाजितावोधिसत्वावो द्वायेन

राम·

त्रः अतिकाकुलितेत्यर्थः तोयधेः समुद्रस्य द्रुः अन्यः नष्टतां यौवजनानां उपकारस्यायटनायां संपादने वैमुख्येन परांड्मुखत्वेन लब्धं यदयशः
नतमारस्य प्रो दूहने मनोर्दुर्दशस्पष्टयथासा हायकं करोषीति स्तुतिपूर्विकेयं व्याजस्तुतिर्निंदापर्यवसायिनी ९७ सहेति· सहदिवसनिशाभि
र्दीर्घाः श्वाससंदंडाः सदमतिवलयैर्वाष्पधाराङ्गलंति सुभगतवावियोगे तस्या उद्वेगशीलायाः सह च तनुलता पांडुर्वेलाजीवितावशेतिसं· द्रूत्या ना
यकं प्रतीयमुक्तिः श्वासानां घनप्रचुरतयादंडत्वेन रूपवर्णनं कार्याणंमिताकंकणागलनं· आशापांडुवेललत्वं कादाचित्कत्वं· अत्र सहोक्तिरलंकारः
९८ अरुचिरिति· अरुचिरीतिमून्यः शशिना विनासापिनिशापिमहदुत्कंटतमांधकारइतिरूपकं· उभयेन चंद्रनिशाभ्यां· स्फुरितं विलसितं· चकास्ति
शोभते ९९ मृगतिनरेंद्रसुनुः राजपुत्रः विचित्रेषुव्यवहारेषु यासप्रतिभायाः स्फूर्तिः प्रभाप्रकाशस्तेन प्रगभः मृगनयनासकस्मिनेवंभूतइत्यर्थः
अनेन तुच्छलप्रकृतिना अमृतद्युतिश्चंद्रस्तद्वत्सुंदराः स्वच्छआशयोन्तःकरणं यस्य सः उदारदरणाद्वयेविनोक्तिरलंकारः पूर्वत्रात्येन विना अशोभ
नत्वमिह तु शोभनत्वमितिभेदः ।१००।। लतानामिति· अयं मरुद्वायुः लतानाम् समग्रं अनुपमम् आमोदं परिमलं प्रयती सन्चयंतं मनोरमं लास्यं नृत्यं
दत्वा अर्थात्लताभ्यः अध्वगानां पांथानां· अहेति खेदे· आधिर्मनःपीडा व्याधिः प्रसिद्धः भ्रमिर्दिक्भ्रमः मरणादशो कोकिलारः रूदितरोदनं मोहो निश्चेष्टता·
एषांव्यतिकं समूहं १ नानेति· हे नय पंसंप्रहारे युद्धे प्रहरः सोरणयधैर्दारुणशाद्वयुक्तानप्रहारान् स्वीकृत्य दर्पयुक्तेन अरिसमूहेन इ यवसुंधाविती
र्णा दत्ता अर्थात् तुभ्यं· कीदृक् निर्विप्रलंभो विप्रलंभशून्यः परिरंभस्यालिंगनस्य स्वस्वामिभवसंबंधस्येतिपावतविधिर्यस्यास्ता दृशी· अनोदाहरणाद्वये
ऽपि यथायोगमुक्तमाधमानां विनिमयोक्तेः परिवृत्तिरलंकारः २ आसीदिति भावीभूषणानां संभारः समूहो यत्र तथाभूता· अत्र भूतभाविनो रंज

नमूषणसंभारयोः प्रसङ्गतयाभिधानाद्भाविकं नामालंकारः २ वपुरिति· हे पुरारे शिव पुराहर्वस्मिन्क्वचिद् पि जन्मनि प्रायः भवंतं अहं न प्रण
तवानिदं वपुषः प्रादुर्भावादनुमितं प्रणामेसति मुक्तिलाभेन तद् संभवादितस्माह संप्रति न मनुमुक्तः अतनुः शरीरशून्योहं अग्रेपि अनेति भाक्
नतिरहितः तत्तस्मात्स्वर्गपारकालीनानमनादिदमपराधद्वयं प्रसवापरूपं संतव्यमित्यपराधहेतोर्वाक्यार्थभूतत्वान्नमनस्योपादानात्काव्यलिंगाल
कारः ४ प्रणयीति· मालतीमाधवे मालतीहंतुमुद्यतमघोरघंटं कापालिकं प्रतिमाधववाक्योक्तिः तत्र तस्मिन्वपुषि शस्त्रमुपक्षिपतस्तव शिरसि अ
कांडे अवनवसरे पमंदं दड इवेषमद्भुजयं तत्वितत्वधः तत्किं पट्टधः प्रणयिनीनां सखीनां पेशलीलं परिहासरसोत्तैः स्थिगतैः पातैः शिरीषपुष्पना
डनैरपि ताप्यति ग्लायति अत्र भुजपातेशस्त्रमुपक्षिपतः इत्यनेकपदार्थो हेतुः ५ भस्मेति गिरिसुताकान्तस्य शिववस्यालयः प्रासादस्तदलंकारभूतां तोपा
नयंक्ति हाशोचामीत्यर्थः अमितरस्मादिनादाशब्दयोगे द्वितीया· पुष्पाकं यासपर्या प्रजातसुखस्यालोकः प्रकाशस्तदुच्छेदके· निधीयामहेवयमिति
शेषः अत्र महामोहत्वे सुखालोकोच्छेदकत्वं समस्तपदार्थो हेतुरिति ६ यमिति यं रावणं ब्रह्मदेन ऐरावतस्येंद्रगजस्य मुखे मानेनाभिमानेन च
हरोरिंदुस्पहृदये विरोगारूढा वृद्धिप्रामापि निवासश्रीति रूपितातस्यांजोसैवं ऐरावंते द्वौ मदमानमूर्त्यो जाताविसर्थस्य वं यसैव भंग्यंतरेणाभिधाना
त्पर्यायोक्तमलंकारः ७ मुक्ता इति· विदुषां भवनेषु केलौ विभूता छिन्नसूत्रा मूत्रा न हारादलिताः संमार्जनीभिर्हृता अपसारिताः अंगणसीम्नि मं
थरं मंदं चलतीनां बालानां वनितानां च रसालालसया अरुणा आरक्ता मुक्ता कर्मभूताः दाडिमबीजेषु शंकिता धीर्येषां ते केलीशुकाः कर्तृभूताः
कर्षतिपतन्तो जनृपतेर्दानलीलायितमित्यन्वयः अत्रोत्कटसमृद्धिवर्णनादुदात्तालंकारः ८ तदिदमिति· यस्मिन्सरूपे निवसन्नरामो वाद्रुमा

त्रसहायो रक्षसां क्षयं चकारेत द्विदसराणपमिति महतः श्रीरामस्यारणेत्कर्षकतुयातं दग्भावादपरच दानभेदः ९ दुर्वारा इति · मार्गणाः शराः
मन्मथसुहृत्कालो वसन्तः स एव कृतान्तः असमा अशून्यः अथवा कृतान्तो यमः असमः अकाले प्राणान् पहर्तुं समर्थ इत्यर्थः चतुराः विरहवि
नोदने कुशलाः इत्थं सति शरो मर्मभेदी विरहः कथं नु · सोढव्य इत्यर्थः अत्र दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतमादिभिर्विरहासहत्वरूपका
र्यसमुच्चय इति समुच्चयालंकारः · नववयःप्रभृतीनां शोभनत्वेऽपि विरहोद्दीपकत्वेनाशोभनत्वं बोध्यं १० कुलमिति · भाद्राः शोभनाः · मूर्त्तिरा
कृतिः श्रुतिः शास्त्रश्रवणं वेदो वा · अलं पर्याप्तं स्फीता विस्तृता · प्रकृत्या सुभगाः शोभनाः अयं दृश्यमानो जनः अमीभिः कुलादिभिः सुतरां
[illegible] दर्पगर्वं व्रजति तत् वतु नत्र एवांकुशाः विनयहेतव इत्यर्थः अत्र दर्पात्मके कार्ये शोभनानामेव समुच्चयः ११
शशीति · रुचा क्रते शोभना क्रते : दुर्गतो दरिद्रः अत्र शशिनः स्वतः शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन शोभनाशोभनरूपस्य तादृशे
रेव कामिनीप्रभृतिभिः समुच्चयः तदुक्तं वृत्तिकृता · शशिनि धूसरे शल्ये यत्सप्तानि त्रासीति सदसद्योग इत्यस्य सदसद्रूपाणामनेकेषां योग इत्य
र्थः · ननु सतोऽसता योग इति · तथा सति सहचरभिन्नत्वरूपार्थदोषेणालंकारत्वासंभवात् · अत एव नृपांगणगतः खल इत्यत्र नृपांगणगा
तत्वेन शोभनत्वे खलत्वेन चाशोभनत्वमिति समर्थनेऽपि सहचरभिन्नत्वात् तदशमुपेक्ष्यैवालंकारोदाहरणान्तरमाशिकैः कृतं · एवं विशेष्य
स्याशोभनत्वं · विशेषणस्य स्वशोभनत्वमिति प्रक्रान्तं इह तु मध्ये निप्रक्रमभंगो ऽप्यत्र ज्ञेयः · न त्र दुर्वार इत्यत्र योगोदाहरणेऽपि कथं न सदसद्यो
ग इति चेत् अत्रोच्यते · इह शोभनस्य सतः अशोभनत्वमिति विवक्षा · तत्र तु शोभनमेवेति विवक्षितं न तु शोभनत्वमपीति न सद्योगप्रसक्तिः

राम· ९३

अत एवात्र मनसि शास्त्रानीत्युपसंहृतं । सुंदरत्वेनांतःप्रविष्टानामपि यथा हेतुत्वात् । तत्र तु सर्वथा दुष्टत्वाभिप्रायेण कथं सोढव्य इतीति निरव
द्यम् १२ विदलितेति । विदलितं खंडितं सकलानामरीणां कुलं येन तत्तरैवलं सैन्यं । प्रबलाः प्रकृष्टबलाः । अत्र विमलत्वमलिनत्वयोर्गुणयोस्तु
ल्यकालतारूपः समुच्चयः स्फुट एवागम्यः १३ अयमिति । विक्रमोर्वशीये पुरूरवसो वचनं । त्वया प्रियया उर्वश्या । एकपदे एककाले भवितव्यमिति तत्सं
बंधः । निरातपत्वेनातपत्रहितत्वेन रम्यो रहोभिर्दिवसैः कर्तृभिः अत्रोपगमभवनयोः क्रिययोः १४ कलुषमिति । नवचरस्य यहितेषु शत्रुविषये कलु
षं अर्थात्कोपेनारुणं च । तेषां शत्रूणां वपुषि आपदां करालैः वर्तिभिः पतितं चेति कलुषत्वपतनयोर्गुणक्रिययोः समुच्चयः । श्रीरामं आरदति । कु
चसचिव तां कुचसहितत्वं । अद्वितीयत्वं निरुपमत्वं द्वितीयरहितत्वं च कृत्वेनाध्यवसितं । अत्र नगुतादेरेकैकस्यानेकत्र स्थितेः पर्यायालंकारः । घनेवक्ष
स्थलापि पूर्वं वक्षसोऽद्वितीयत्वागमादलंकारः संभवो ध्यः १५ नवितिति । हे कालकूट विष उन्नतेन रविशिष्टमुत्कृष्टं पदं यस्यास्तादृशी इयमार्यापङ्क्ति
त्वकेनोपदिष्टेत्यत्वयः तदेवदर्शयति । भागिति । हृदयं अश्रयं तेन च तदितिशेषः । अथानंतरं । वृषलक्ष्मणो हरस्य । अघनापुनरितिसंबंधः । अत्रैक
स्यैव कालकूटस्य क्रमेणानेकत्र स्थितिः १६ विगेषष्टवेति । विंवसदृश ओष्ठो बिंबोष्ठः । श्रीलोचनयोरितिपरंतु १ श्रोष्ठेरागो लोहित्यं हृदये तु तेजः । अत्र
श्लेषेणाभेदाध्यवसायादेकोऽपि पदार्थः क्रमेणानेकत्रोक्तः १७ ततोतिति । तत्ते यां श्रीसहोदररत्नाभरणोहृदयमेकरसं विंवाधरे विघातो निवेशितं
कुसुमवाणेनेति सं । श्री सहोदरं रत्नं कौस्तुभ आभरणं यस्य तादृश्मिन्श्री विष्णोः पकरसमेकं तां नतत्ते षां पातालवासिनामसुराणामिति चंडीदासः
हृदयं कुसुमवाणेऽभ्रविघातां कांतानां विंवसदृशोऽधरे विनिवेशितमित्यनेकत्र स्थितेः पर्यायो न कनिर्द्दिष्टाद्भेदः १८ मधुरिमेति । मधुरिमाहचि

रखलानां वचनं प्रथमं एष्ट्व वक्तुं अमृतत्यनक्तिप्रकाशयति अथ विचारानंतरं तदेव खलवचनं मोहहेतुभूतं अंतर्गतं हालाहला खं वि
षं कथयति अहो आश्चर्यं· अत्रैकस्मिन् खलवचने क्रमेण मृतविषयोः स्थितिरिति पूर्वं विपरीतः पर्यायः १९ तद्देहमिति· अयं द्विजः दिवसैः
कतिपयैः इयतीमपि समृद्धिं सीमां समारोपितः इत्याश्चर्यं· तदेव दर्शयति तद्देहमिति· तत्पूर्वं दृष्टं नताः स्वर्वा भित्तयो यस्य तत· दिवौ तदिस्मात·ज
रतीजीर्णा· यताभाः मेपत्रुत्साः घटाः श्रेणयः कलमधुरस्वरं· अत्रैकस्मिन् द्विजे तद्देहमंदिरादीनामनेकेषां क्रमेणास्थितौ दिवसैरिति प्रयोजकानि
दृष्ट्वा इति भेदः २० यत्रैतादृतिः यत्र जने एता कामिन्यः लहरी वक्त्रलाश्च यला दृशो या संताः अमी अनुभूयमानाः मार्गणाः शराः पतयस्मात· तत्रस्मा
त स्मरः आसां कामिनीनामग्रतः एव सदा मंडलीकृतचापं यथा स्यात्तथा धावतीति संकीर्णं दृक्स्मरः· अविते यो जिते शौर्ये स्वनृचयनः करोपस्य सः· शा
स्तनमात्रान् तद्धारकः अत्र पूर्वार्द्धोक्तहेतुना अयत्नात् दशमदनधावनस्य साध्यस्य साधनात् उत्तमभालंकारः प्रयोगस्तु एताः पुरो धावन्त्या विधमदनाः मर्म
भेदिवाणपातव्यापृता व्याप्यत्वादिति बोध्यः २१ महौजस इति· धनुर्भृतो धनुर्धराः भटास्तस्य सुयोधनस्य श्रियाणि असुभिः प्राणैः समीहितुं कर्तुं वांछंती
त्यन्वयः अत्र महौजः शालित्वेनानाक्रमणीयत्वं मानधनत्वेन युद्धे पलायनाभावः ब्रह्मपूजितत्वे नोपेक्षा एहिमसंथामेलब्धकीर्तित्वेनोत्साहः स्वनाय
शालित्वं च असंहतत्वेन सहायानपेक्षत्वं· अभेदवृत्तित्वेन प्रभुप्रयोजनैकपरत्वं च यस्य तत्त्वं क्रविशेषणानां साभिप्रायत्वात् परिकरालंकारः २२
शैलेन्द्रेति। शिवो वः युष्मानवतात् रक्षतु· कीदृशः शैलेन्द्रेण हिमवता प्रतिपाद्यमानादीयमानाया गिरिजायाः हस्तस्योपगूढं आश्लेषः भावेक्तः तेनोल्लसद्रो
मां वादिभिर्विसंस्थुलो व्यग्रश्चासौ अखिलस्य विधिव्यासंगास्य भंगेनाकुलः तत अस्मात्त्विकभावगोपनाय तुहिनाचलस्य कस्पोहापि त्वसमितृचिवान्·

हा इति विस्मये· शैलांतःपुरं च मातृगणं ब्राह्म्यादीनां मंडलं समूहः अगणाः त्यक्ता इति विग्रहः सस्मितं इत्यस्य· अत्र स्मात्विकभावस्पर्शो मां वा देहि म
वत्कारस्पर्शानिमित्तकत्वेन गोपनाद्याजोक्तिरलंकारः २३ किमिति· आसंगं संवननीयं· ध्यु सरितः गंगायाः सविधं तीरं· अनवद्यं उत्तमं येषु घुसृ
·स विधादिषु आसत्त्वया· निसर्ग वधिर्या विमुक्तिः स्वापुण्यरूपा तदर्थं· अत्र सेव्यत्वे नाव्रगतत्वे गंगा सविधादेः पुनः कीर्तनमितरपरिसंख्यार्थमिति
सेवालंकारः २४ किमिति· अत्र लोके आर्यैश्चरितमाचरितं तत्सत्कृतं पुण्यं कर्म· दोषो व्यभिचारादिः धिषणा बुद्धिः· अभिमतो ज्ञारदभ्यादा हृजानाति स्वा
दि· अत्र व्यवच्छेद्यं वाच्यमिति भेदः २५ कौटिल्यमिति कौटिल्यं कपटं· कुंचितत्वं च· रागः पक्षपातः रक्तिमा च· काठिन्यं निर्दयत्वे· दृढता च· तरलत्वं अवि
चार्यकारित्वं चपलता च· अत्र तद्दयादौ नेति व्यवच्छेदः प्रतीयते· पृथ्वीभावात्सर्वस्माद्भेदः २६ भक्तिरिति· भक्तिरासक्तिः भवे शिवे· व्यसनं रुचिः प्रव
तिरेव कामास्त्रमिति विग्रहः अत्र व्यवच्छेद्यं वाच्यमिति विशेषः २७ जितेंद्रियत्वमिति सममेव्याख्यातं· पूर्वपूर्वस्योत्तरोत्तरं प्रतिहेतुत्वात्कारणमालाल
कारः अविरलेति· अविरलं निरंतरं कमलानां विकासरूपं इत्यर्थः आपुष्टं तमिति वत्कार्यकारणयोरभेदेनाभिधाने· एवमग्रेपि· अपंचहेत्वलंकार इ
ति भट्टोद्भटमतं २८ हंसाराविति· हंसानां सरोभिः श्रीः साऽरीक्रियते अथ सरसां हंसैः अन्योन्यमेव तेऽत्मानं केवलं गुरूकुर्वंतीति सं· श्रीः शोभा· सारी
करणं श्रेष्ठतासंपादनं· अत्र सरोहंसयोः परस्परं शोभाधीकरणरूपोपकारजनकत्वादन्योन्यनामालंकारः २९ वाणि श्रोत्रेति वृणिक्कदसिदंताः कु
तो स्मात्कस्मात्प्रकृतमपश्यमावह्लुलिताल कमस्तीगृहे परिसंक्रमंतं स्तुषे निस्सं· एषा हि कैतार वणिजं प्रतिजरद्व्याधस्योक्तिः वणिक्केति स्वार्थिके क
प्रत्ययः यांतं संबोधनपदं· हत्त पश्यमागिति· लुलिता अलका यत्र तादृशं मुखं यस्याः साइति विग्रहः· परिसंक्रमते परिभ्रमति· तथा च पुत्रस्य स्वकांताया

मासक्तत्याहस्तिन्या प्रहननपारवाभावात् स्वदृहे दंतक्षतिविरहइतिभावः अत्रोक्तरूपेणोत्तरेणात्तदृहेहस्तिदंतव्याप्रक्षत्रयः संगतीतिकेतुः प्रश्नोत्त
यनाउत्तरालंकारः ३० केति · काविषमादेवगतिः। किंदुर्लभमपज्ञानो गुणग्राही · किंसौख्यं सुकलत्रं किंदुःखं पतत्खलो लोक इति सं· स्पष्टं · अत्र चम
त्कृतस्थलोकाप्रसिद्धस्थवीतरप्रासहृदुक्तिर्द्वितीयोभेदः ३१ वक्केति · कंठेस्थितंकुंकुमंवक्रात्तस्यंदिभिर्गलदिः। स्वेदविंदूनां प्रबंधैः पंक्तिभिर्भिन्नं संभि
न्नं द्रष्टुकाप्रियवयस्यासंवीक्षितात्यहसितात्तन्व्याः पुत्रत्वं पुरुषापितं व्यंजयंती सतीयाणो स्वद्रुलेखालिखितवती · पुरुषामेवयाणोतस्याउचितत्वा
त् · अत्राकारेणलक्षितं सवुद्धिर्तया सूक्ष्मं पुरुषापितं पाणौ खड्गलेखनेन शक्ताप्रितमितिसूक्ष्मालंकारः ३२ संकेतेति · विटं नारे संकेतकालेमनो
वस्थ[illegible]ज्ञितात्ममुभिःस्वार्थः अत एव हसद्धीनेत्राभ्यामर्पितं सूचितमाकूतं दहस्यंपेन ताह्नशं तालाविदग्धया नायिकपालीलासं वंधिपसं निमीलि
तमित्यन्वयः अत्रेंगितेन लक्षितः सूक्ष्मो भिप्रायः कामिन्या निशासूचके नपत्रनिमीलनेन प्रकाशितः ३३ राज्यइति · सौधं सुधागृहं · अनंगसर्वस्व
मितिरूपकं अत्र पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षस्थरसमस्तसर्वोत्कृष्टत्वपर्यवसनः सारालंकारः ३४ जस्सेव इति · यस्यैव व्रणस्तस्यैव वेदना भण
ति जज्जनो ऽलीकं दंतक्षतं कपोले वध्वा वेदनासपत्नीनामिति सं· वेदनेति पज्जनो भणतीति वदतितदीलीकमित्यन्वयः अत्र वेदनादंतक्षतयोः
कार्यकारणयोर्वैयधिकरण्यरूपासंगतिरलंकारः ३५ मानमिति · दिष्ट्या भाग्येन · उदीर्णं उदितं · अत्र घनगर्जितरूपकारणांतरयोगेनमा
नापगमरूपकार्यस्य सुकरत्वात्समाधिरलंकारः ३६ धात्विति · शिल्पकौशलं तदतिशयस्य निकषस्थानं परीक्षास्थलमितिमृगाक्षी विशेषणं रूपे
रूपविषये · दत्तयत्न इति विजयायेत्यादि संगतमितिभावेक्तः समागम इत्यर्थः देवादित्स्योपनत[illegible]मित्यनेनवाचयः अत्रो चितयोगवर्णनास

मालंकारः ३७ चित्रमिति अत्र चित्रवत शब्दयोर्वीप्सा विस्मयातिशयद्योतनाय · परिणतं पक्वं स्फीतिः समृद्धिः एतस्याः फलसमृद्धेः क
वलनं कलाभक्षणं चातुरी तत्र कोविदः पंडितः अत्र द्वयोरपि निकृष्टतयोचितयोग इतिभेदः ३८ शिरीषेति · शिरीषात शिरीषपुष्पा
त् · कुकूलाग्निः कुंभकारचितोऽघटादिपचनाग्निः · अत्र कथाद्वोर्कद्वयोरत्यंतवैलक्षण्यप विषमालंकारः ३९ सिंहिकेति सिंहिका सिंही · राहु
माता च · तत्सुतः सिंहो · राहुश्च · जग्रसे कवलितवान् · अत्रेष्टसाधने प्रवृत्तस्य विपरीतानर्थप्राप्तिरूपो विषमभेदः ४० तदिति · तमालवन्नीलाह
याणास्थले रणयस्य राज्ञः करस्पर्शमवाप्य सद्यस्तत्कालं रोरोपतिसंग्रामं धारदिंडुवसांडुप्रभ्रंपयशः प्रसूते एतच्चित्रमित्यन्वयः अत्र कार्यकारण
योर्विरुद्धगुणत्वरूपो विषमः ४१ आनंदेति · अमंदं अनल्पं · अत्र कार्यकारणयोरानंददाननायनक्रियेविरुद्धे इति चतुर्थो विषमः ४२ विपुलेने
ति · सागरे शेते इति सागरशायपत्नादशस्यपस्य विष्णोर्विपुलेन विस्तृतेन कुक्षिणा युगक्षये भुवनानि पपिरे पीतानि स पुनः सोपी स्वर्थः एकतम
या कया चित्रगरका मिमा मदेन विभ्रमो विलासो यस्यां सा चासावसकला असंपूर्णा च तथाभूतये कयाद्दशा यपेसादरमवलोकितः ४ वयामइ
त्यभेदाध्यवसानं · अत्राचयचाचयविनोः यानकर्तृकर्मतारूपं वैषम्यमित्साघंतनभेदोयं सुधीभिरूहनीयः ४३ अहोइति · मानीति अवकाशोल
भतइत्यर्थः अत्र कविविवक्षावशेन महतोपयशोराशेराधेयत्रजगपित्रिभुवनरूप आधारो महत्वेनोक्तइत्याधिकमलंकारः ४४ युगांतेति · यु
गांतकालं प्रतिसंहृतआत्मा स्वात्मभूतः प्रपंचो येन तस्य कैटभद्विषः श्रीविष्णोर्यस्यांतनो जगंति भुवनानि सविकाशं सावकाशमासतउप
विशंति स्म तत्र तस्यांतनौ तपोधनस्य नारदस्याभ्यागमसंभवा मुदः पीतयोन ममुन विकाशंप्राप्तवत्य इत्यन्वयः अत्राधेयानां मुदां महत्वो

९६

96

क्रियात्मपरो भेदः ४५ त्वमिति· अनुशयात् द्वेषात् भवेदनुशयो द्वेषदुत्तिविग्रहः अत्र स्वशत्रुं नायकं जेतुमशक्तेन कामनं तत्त्वातिनिषिद्धत्वेन दी
पकामिनीपीडना त्वत्पनीकालंकारः ४६ यस्येति· यस्य श्रीकृष्णस्य रुःकायस्य निग्रहो वधस्तेन गृहीतः स्वीकृतो विग्रहो वैरं येन सः कांतेस्तत्रय
स्येत्यनुषज्यते· छन्नी· वैरनिर्यातनेक्षशालः अत्र श्रीकृष्णचंद्रयोः परंपरया संबंधित्वमिति विशेषः ४७ अपांगेति· अपांगस्त्तरलोपयोस्तद्इति वि
ग्रहः· मधुराश्चतेवक्राव क्रोक्तिसमर्पकावर्णाया सुतागिरउक्तयः· इति प्रकारेण मृगदृशामंगके लीलया कस्मीस्वतः स्वभावतः स्फुरितं तन्नस्मा
दत्रकृतं पदं स्थानं येन तादृशोपि मदस्य मधुपानजन्यस्योदयो न लक्ष्यत इत्यन्वयः अत्र मदसाधारणो रंगस्य स्वाभाविके स्थांगतरलतादिचिह्नैर्म
दस्यगोपनात्मीलितालंकारः ४८ यदिति· तेतवयेद्विषस्तस्तातेआगमने शंकिताधीर्येषां तादृशाः संतो हिमाद्रेः कंदरासु निवसंतितउक्तरो
मांचकंपसहितमंगमुद्वहन्ता मपितेषांभयानां बुधःपंडितो पिनाभिजानइत्यन्वयः अत्र रोमांचकंपयोरागंतुकयोर्भयसाधारण्याविद्रूपयोर्भयति
रोधायकत्वे ४९ पुराणीति घस्रां दिशि· रूपेणपुरस्कृतं भूषितमंगं यासांताः· विलासाः कुसुमायुधस्यास्त्रमिति रूपकं· अत्र पूर्वं पूर्वं पूर्वस्मिन्नुत्त
रोत्तरविधानरूपेकावल्यलंकारः ५० नतज्जलमिति· नलीनः षट्पदो भ्रमरो यत्र तत्· कलंकलस्वरपुतं यथास्यात्· अत्र तादृशनिषेधरूपे कावली
५१ निमेत्रेति· चलदृशां गंभीरनाभिविलेषु लहरीभिर्नलक्ष्मीगयोः पदं मः स्नाविंतं संचारितं तद्दैवैः कुहरैस्तैः कुहरकुहरशब्दैः सुरनार्योस्मरसः सुरतसंव
धिकं ठकृतानां स्मारितानि इति कर्मणिषष्ठी· अत्र सदृशदर्शनजन्यं स्मरणमलंकारः ५२ करजेत्येति करयुगगृहीतयशोदास्तनमसुखविनिवेशि
ताधरपुटस्य स्तनपांचजन्यस्य नमत कृष्णस्य रोमांचमिति सं· स्तनयोर्मुखमिति विग्रहः पांचजन्यः श्रीकृष्णस्य शंखः अत्र जन्मांतरानुभू

राम ९६

तंस्मरणमितिभेदः ५३ कपालेइति॰ सर्वेत्रइति त्रावोस्मदंबुध्येजिशेषोवेोप्यः कपालेस्थितानिति शेषः लेटि आस्वादयति तत् रुणछि द्वेष्यप्रोतान् प्र
विष्टान् संकल्पयति गच्छाति॰ रतान्नेहरवीतिसंबंधः प्रभया मत्तस्तदतिशयशाली॰ अत्र सदृशदर्शनजन्याभ्रान्तिरलंकारः ५४ लावण्येति॰ श्रीकोग
हं गरिमा गोरवं॰ त्यागिनां दानं हरणं अग्रेसरे अग्रगण्ये॰ अवनीभरेक्षमः समर्थो भुजोयस्यैवं भूते त्वयि वेधसा निष्पादिते सति॰ किं किमर्थमित्यर्थः
पूषा सूर्यः चिंतारत्नं चिंतामणिः सुधैव वृथैव॰ कुलक्ष्माभृतः कुलक्ष्माभृत कुलपर्वताः अत्रोपमानानां वैयर्थ्यं प्रतीयमलंकारः यथा संक्षेपसत्वेप्या
क्षेपव्याधावत्रैदाहरणं तं ५५ एएहीति॰ अपि एहि तावत्सुंदरि कर्णं दत्वा शृणु वचनीयं तव सुखेन कृशोदरि चंद्र उपमायते जनेनेति सं॰ वच
नीयं निंदितं अत्रोपमानस्योपमेयकल्पनमपरं प्रतीपं ५६ गर्वमिति॰ असंवाद्यं संवहनापोऽप्य अपरिमितमितियावत्॰ मद्वेशमनि॰ पूर्वं त्रवचनीयते लो
कृत्ताउपमितेरपर्यवसानं इह तु निष्पन्नासातिरस्कारहेतुरिति भेदः ५७ अहमेवेति॰ तातेतिसानुकंपसंबोधने॰ तातोऽनुकंप्ये जनकइति विश्वः मां सम
दृश्यः गर्वमाकृथाः अत्र लिरूपं मत्वेन गर्वोपमाराणस्योपमानताकल्पनरूपं प्रतीयम्॰ ५८ मलयजेति॰ मलयजं चंदनं सिततरं सुभ्रतरं दंतपत्रं दंत
निर्मितताटंकं ते नक्कतावकेरूकूदीसियस्ताताः विततं विस्ततं धामतेजो यस्य तस्मिन् षशिशे धीधवलयति सति अविभाव्यता अलक्ष्यता॰ अत्र
पकृतापकृतयोरभिसारिका चंद्रिकयोर्वैवश्चिन्तगुणसाम्येकात्मतावर्णनात् सामान्यमलंकारः ५९ वेत्रेति॰ वेत्रत्वचः पीतवर्णास्तयोपतानतताः कर्णा
ग्रतः कर्णयान् गंडनले आगतानीति नीलवर्णकेशसान्निध्याद्युक्ताभिव्यक्तिवारणाय॰ भृंगा भ्रमराः कः अवेदष्यत अत्तास्पत्॰ भृंगागतेन ल
क्षितानीत्यर्थः तत्रोत्तरकाले विवेके न पूर्वमेकात्मताप्रतीतस्तत्रयनां तु दाहरणं तं ६० दिवमपीति॰ दिवं स्वर्गं आकल्पं कल्पपर्यंतं अनल्पेतिगिरं

निशोषणं तांस्तथा गिरीशं जगन्तरमपंतीतिसंबंध· अत्र कविरूपापसिद्धार्थाः विनाऽपि उपभूतानां गिरामवस्थितिवर्णनादेकोविशेषालंकारः ९१ सेति·
सा वसति तव हृदये से वाक्पतेः सा व वचनेषु अस्मादृशानां संदराऽवकाशो नास्ति याया नामिति सं· चकारोऽवधारणे तेनैवेत्यर्थः· अत्रैकस्याः का
मिन्यायकरूपेणायुगपदनेकत्रस्थितिवर्णनाद्वयरोभेदः ९२ स्फुरदिति· हे राजन् त्वां स्तनतां विधिना मविनयो मनोभवादिः सत्तजेइति सत्तामित्यन्व
यः एतदेवोपपादयति तं यथाक्रमं विशिनष्टि स्फुरदित्यादि· अत्रैकं कार्यं कुर्वता तेनैवपलेनाशक्यकार्यान्तरकरणात्तृतीयो भेदः ९३ गृहिणीति· ईड
मत्तीशोवतोऽजस्येयमुक्तिः मिथो रहसि ललिते कामकलाविधौ/ विषयेप्रियभूताशिष्या· मिथो मोऽन्यरहस्यपीत्यमरः· अत्र सचिवादि सर्वहरणा
रूपकार्यान्तरकरणं पापमितिभेदः ९४ विभिन्नेति· मायेवैवनकवर्तितंनारूढस्याग्रजेनाहृतो न विभिन्नवर्णः स्पर्धयाथा अग्राः पत्ररेवतक
णिशोर्वशांकुरवल्लीलैः रंतैः परितः स्फुरंत्या रूचा कांत्यां सह उच्चैनीलघुति आनि स्निरे न्यानीतवंतः इत्यन्वयः· गरुडाग्रजेन परितः स्फुरंत्या रूचा वि
भिन्नवर्णा इति वा· अनाघ्रातांस्वीगुणतया गेनावलक्तनाकृष्णानुहरणा वर्णानामनुगुणालंकारः ९५ धवलइति· धवलोसि यद्यपि सुंदर तथापि त्व
यामम रंजितं हृदयं· रागभरितेपि हृदये सुभग निहितो न रक्तोसीतिसं· धवलो निर्मलः श्वेतश्च· रागो लौहित्यं अनुरागश्च· धवलपदस्य वृषभ
परत्वमपि केचिदाहुः· अत्रोत्तरार्धे अप्रस्तुतेन नायकेन निवेदनीयवृत्तान्ततया प्रस्तुतस्य हृदयस्य गुणाननुहरणात् तद्गुणोलंकारः ९६ गांगु
मितिः यमुनासंबंधियामुनं अंबु जलं न चीयते नवर्द्धते· नापचीयते नापक्षीयते· अत्र प्रस्तुतेन हंसेनाप्रस्तुतगुणाननुहरणाद्भेदः ९७ दृशे
ति· विद्रुपाक्षः शिवः· अत्र हरेराद्दृशा दग्धस्य कामस्य हरजिगीषुभिः कामिनाभिर्दीर्हहेतुभूतया दृशैव तद्विपरीतजीवनसंपादनात् आधानो लं

कारः ६८ वदनेति· मात्रेक्रतुवर्तिने परिभ्रमतां भ्रमराणां संभ्रमेण त्वराविशेषेण संभृता समद्राक्षो मायस्याः स्याः स्याः अलकालोलापस्यां तादृशी
दृक् यस्यास्तथाभूतयेति अत्रानुप्रासयमकयोः परस्परनिरपेक्षयोर्योगात् संसृष्टिः ६९ लियतीति· ध्येयात्यां तं· अत्रोत्प्रेक्षोपमयोः संसृष्टिः ७०
सोराज्यतीति· सनासस्य त्रयामेपरत्तास्फुरत्सावण्णनातरुणानां हृदयलुंठनं परिसंक्रामतीति वारयतीति सं· हृदयलुंठनमितिरूपकं आपुर्यतामितिव
त्· पूर्वार्द्धे त्वनुप्रासः एवं च शब्दार्थालंकारयोः संसृष्टिः ७१ आन्नेति· हे राजन् अत्र रूपे ईत्वरीणां मधादितस्ततो गमनसालानां त्वदरिमृगदृशां सी
मंतरत्नेषिरोभूषणो आन्तेगृहीते· मरकरमणिशालिनि हेमस्ताटंकपत्रे कर्णाभरणोहृते मेखलायां लुप्तायामाक्षिप्ताया· मीणापटिते तुलाकोटियु
ग्मे नूपुरयुगले सति इति गृहीते च सद्दृशौ हकांस्याशोणमारकं मुक्ताहारं गुंजाफलानां स्रजइति बुध्याशवराध्याधानेवहरंतीत्यन्वयः अत्र विवेोक्ष
कांस्याशोणमिति तद्गुणालंकारः स्रग्गुंजाफलस्यांस्यलंकारं गतात्वयोरंगांगिभावलक्षणः संकरः ७२ जटेति· शशीपितृवने श्मशाने इव व्योम्नि
आकाशे चरति संचरतीत्यन्वः कीदृशः जगमाभिर्जीयसदृशीभिर्भाभिः किरणैरुपलक्षितः करैर्धृतकलंकएवाक्षवलयं रुद्राक्षवलयं येन सः क
रोरश्मिः पाणिश्च· वियोक्तुं शीलं येषां ते वियोगिनो विषयाः विरहिणश्च तेषां व्यापत्तेर्नाशादिव कलितं स्वीकृतं पट्टैरां पत्राः सितद्गुविगतरक्तिमत्वं
च तेन विशदः पांडुरः शुद्धचित्तश्च· भस्मेवायांडुः भस्मनापांडुश्च· कीदृशे व्योम्नि· परितः सन्तन्चयलोपतारागणापरिकरः समूहः स एव कृपा
लानि नैरंकितं चिह्नितं तलं पस्य तादृशे तलपदं स्वरूपार्थकं· अधः स्वरूपपोरवीतलमित्यमरात्· अत्रोपमारूपकोत्प्रेक्षाश्लेषाणामंगांगिभा
वः सखीभिरुहनीयः· पहाव्रतिदृत्तांतस्य चंद्रदृत्तांते समारोपात्समासोक्तिः प्रधानभूतेति विज्ञेयं ७३ राजतीति· इयं तरीस्थलीराजतीत्यन्वयः कि

भूता· अभिदतो भिया तं प्राप्तः दानवानां रास्तः सिंहनादोपस्थां तां अतिपातीविगवान् स राव: स्वशब्दो नदोपस्थां तथाभूता · एवं साप्रसिद्धा गजता
गजसमूहस्य पृथं कुलं अतिशयेन पाति रक्षति· कीदृशी अविरतेन दानेन मदजलेन वराश्रेणा· सा शाखिरा· वनदा· वनखंडिका· अत्र यमका
नुलोमविलोमयोः संकरः ७४ जहेति· यथा गंभीरो यथा रत्ननिर्भरः यथा च निर्मलच्छायः तथा किं विधिनेष समुद्रस्य यानीयो जलनिधिर्न कृत इति
सं· रत्ननिर्भरो रत्नपूर्णाः अत्र समासोक्त्यपह्नुत्यंशयोः संदेहरूपः संकरः एकसाधकाबाधकप्रमाणाभावात् ७५ नयनेति· निरूढा आ
शा दिशो येनेति तमो विशेषणं· अत्र रूपकातिशयोक्त्यादीनां संदेह इति भेदः ७६ स्पष्टेति· अथो ऽनंतरं दिवसरूपमरविंदकमलं सं चुकोच संको
चं प्राप्तवदित्यन्वयः कीदृशं· स्पष्टमुल्लसंतः किरणा एव केसराणि यस्मात्तथाभूता सूर्यबिंबमेव विस्तीर्णा कर्णिका यस्य तत्· तथा श्लिष्टाः प्रका
शाभावेन परस्परं मिलिता अष्टौ दिशा एव दलानां कलापः संकरः ७७ चक्रीति· सः अहिमरुचेः सूर्यस्य स्यंदनो रथः वः अवतात् रक्षतु· सकः ज
गतामुपकृतये नित्ययुक्तस्य यस्य चक्रारपंक्तिं चक्रगतानामाराणां कीलानां पंक्तिं चक्री विष्णुः अन्वहं प्रतिदिनं प्रीत्या प्रसन्नः सन् नतोऽति· एवमग्रे
ऽपि कर्तृकर्मभावेनान्वयो बोध्यः हरिरिंद्रः हरीन् अश्वान्· धूः रथमुखं तत्कृतान् ध्वजाग्रान्· धूः स्त्री क्लीबे यानमुखमित्यमरः· अरं सचक्रं· नक्षत्रनाथ
श्चंद्रः अरुणं सारथिं कुबेरः अग्रयुगंधराग्रं· रंहः वेगं· सुराणां संघः स्यंदनं इत्यन्वयः अत्र च अस्यादीनां कर्तृकर्मणां नियततया निबद्धत्वात्तु वक्ष्येति हासादि
बुप्रसिद्ध्यभावोऽनुप्रासदोषः ७८ भक्तेति· यथा हृदयात्मकं युग्ममहं हे तरुणि यदि मत्तस्यमंदिरं गच्छसि तत् दास्ये दीपं पदिरमणं रमनं नं मम अका
रणं निमित्तं विना रणारणकमुत्कंठां किं कुतः कुरुते त्वमन्मथः रमः रमणमंदिरं रतिमंदिरमित्यर्थः आनंदस्यंदी सुंदरो ऽपरंदुः स एव मुखं यस्याः तथा

भूते॰ सतीलीलाउल्लासः पवित्रं शीलं यस्याः उल्लापिनीति पाठे सतीमिलीलाभिरुल्लापिनं शीलं यस्याः इत्यर्थः अरुरोरुक्रौंचरन्ध्रोपस्यास्तथाभूते॰ कीदृ
कपदि स्मरतां॰ अनलम् अनल्पं रणनीमणिभिर्ब्वलायत्र तत्॰ अविरतं सिंजानं शब्दायमानं मंजु सुंदरं मंजीरं नूपुरं यत्र तादृशं॰ अत्रार्थस्य चमत्कृतत्व
त्वादूहूतत्वमनुप्रासदोषः ७९ अकुंठेनिति ममममेम्बारितोनातं अत्र माधुर्यव्यंजकत्वविरोधोऽनुप्रासदोषः भुजंगेति॰ मदं माद्यमपुरुज्ज्ञाः खलाः श्रीर्यानु
दितं जगाम परिणामपुरुषं तानिश्चितवत्तोपिजंतोस्थेतः प्रमुखेआयातः कर्षतीत्यन्वयः प्रसभमिति वायातः कद्वत ततविद्यमानं मंमस्तेजो विशेषो यत्र ता
दृशो भुजंगमस्यमस्तिरिव॰ तथाह्याहेत्वकीर्णामामा सततस्समाचीनमंमउदकंपस्यास्तथाभूतानदीवेत्युपमा द्वयं॰ अत्रयमकस्य पादत्रयमात्रगतत्व
दोषः तथाकविभिरप्रयोगात् ८० अयमिति॰ पद्ममेवाम्बरं तत्र आसीनस्तपविष्टः मृगादेर्वृजाः विमिर्मित्साः। निर्मातुमिच्छुर्भगवान्ब्रह्म अन्येवेतिज्ञा
त्वा उपमानमधिकं च। पानाल मिति॰ कार्तिदीयातोयस्तुनाप्रवाहः अत्र परिमाणतउपमानाधिकं ८२ समुनिरिति॰ मोमालांछितस्थितिर्जितः क्रमाजि
नरूपं परंबृहन्न समुनिर्नारदः नीले नजीमूतमार्गेन मेघखंडेनाश्लिष्टं अशुभ्रा मन्वर्यद्वन्द्वन्वराजदित्सत्वयः अत्र मोजीश्यानीयस्त डिट्ठ्योधर्मोनोक्तइतिध
र्मन्यूनता दोषः ८३ सइति॰ पीतवर्णोवासो वस्त्रं यस्य सः अरहीतं शार्ङ्गं धनुर्येन स श्रीहृत्पा मनोज्ञं सुंदरं वततत्मीमं वपुर्यस्य कइवशह दराविकात्तइं
द्राघुधंइंइधनुः स तद्वान तिशांयाशशिनासंसत्पमा नोमेघइव॰ अत्रोपयेशं तस्यानुक्तित्वात्स्थानीयस्य चंद्रस्योपमानेग्रहणमधिकमिधर्माधिक्यदो
षः ८४ चिंतारत्नमिसादिदियघत्वडानिस्पष्टार्थानि॰ तत्राद्यद्वयेक्रमेणामलिंगवचनभेदो दोषः। अंत्येलिंगभेदस्यादोषत्वम॰ तदुक्तमिति॰ तस्याः प्रकृततना
पिकायविषः मूलत्वांवत्दिघा रत्नापरिपाटीपरंशोभांदधतेस्म॰ कीदृशः अप्यामित्रोभिरसदृशः विभ्रमपदसेसदृक्षुशब्दस्य बहुवचनं। मधुरत्नाभूतः पूर्णाः

ध्र७

९९

99

पक्ष्मेमधुरतां विभ्रतीति तथाभूतदधत इत्यप्येकवचनबहुवचनसामान्यात् नामतो नात्र वचनभेददोषः ८५ अतिथिरिति: काकुत्स्थाद्रामात्कुमुद्वती नाम
ती अतिथिं नाम पुत्रमापप्रा प्रसवती का कस्मात्कमिव · पश्चिमा नचरमा यामिन्या निशायाः यामात्प्रहरान्नाचेतनं प्रसादमुद्बोधमिवेत्यर्थः अत्र यथा चेत
नात्प्रसादं प्राप्नोतीति तथा सा पुत्रमापेति कालभेददोषः ८६ पत्न्यग्रेति · पत्न्याग्रमहिषी हस्तेनाञ्जनं स्नानं · स्नाने चनं च · तेन विशेषतः शिविका शुद्धा मूर्तिः
शरीरं यस्याः सा कौसुम्भेन रागेण रुचिरः स्फुरद्दुकूलं कस्मात्तः यान्तो यस्मात्तादृशी पक्षे कुसुमभेव कौसुम्भं तथ्यं सार्थं राज्ञस्य पत्न्या हृद्रागो लौहित्यं तेन रुचि
राचामेमा स्फारद्रिरं शुभ्रः पुष्पधूलिकां तारमणीयाम करकेतनं कामम र्चयंती त्वं चाला: प्रवाला: पल्लवा यस्य तादृशं मविटं यश्शरलतामभवत्उसनिष्यानं
यस्याः सालतेव विभ्राजमसेशोभमानेत्यर्थः अत्र लता विभ्राजेत्वं विभ्राजमानेति प्रत्ययमभूपपूरुषभेदः ८७ तिथेनुरिति: वर्तुंमण्डलमध्यगतस्य तस्या
स्मादिवदीप्ताः शरानि ये तु:· दिनाद्वर्भावः पविवेषशालिनो ऽर्कः सूर्यात्तन्नाथवल्पमानावारिधाराइवेत्युपमानाप्रसिद्धिर्दोषः ८८ उपयाविति · दीर्घिकावा
पीतन्मध्यात् मुकुलस्थूर्यमेव कोमलं नीलोत्पलं उद्धृतं · नारीलोचनचातुर्यस्य शंकामयं येतेन संकुचितमिवेत्युत्प्रेक्षायां यथाशब्दस्यावाचकत्वं दोषः ८९ दि
वाकराद्दितियो गिरिः दिवा दिवसे दिवाकरात्सूर्याद्भीतं अत एव गुहासुलीनं अंधकारं रक्षति · अर्थात्तदंनमस्यति · नूनमिति तस्य दिपिशरणागतामेउच्चैः शिरो ये
षां तादृशानां महतां अतीव ममत्वं भवतीति शेषः अत्रोत्प्रेक्षाविषयस्य तमसो भयस्यालीकतया तन्मूलस्यार्थान्तरन्यासस्य निर्विषयत्वं दोषः ९० स्पृशन्ती
तीति · तिग्मरुचौ सूर्ये ऽर्के रेःककुभोदिशः स्पृशति सति विजृम्भितजाययाविरहदूनापपादयितयेव दिनाश्रिया ग्रीष्मदिनशोभया अतनुदीर्घमानपरिग्रहो यस्या
स्तथाभूतमास्थितमिन्द्रयः किंभूतया चिरस्या विविरकालीनया विरहचिरयामनोरया · कराग्रमयः हस्ताश्च · तायउष्मता · खेदश्च मानोभिमानः · मांनप

राम०

९९

रिमाणां च॰ अत्र समासोक्तौ श्लिष्टविशेषणबलाल्लिंगवशेन च निगमरूपे चर्मोपकतयाकं कुभां च नायिकात्वेनाभिव्यक्तिवदिन स्त्रियोपि प्रतिनायिकत्वेना
भिव्यक्तिसंभवाद् पितयेत्यपुष्टार्थम् ॰ ९१ स्वयं चेति॰ तवमक्वास्यातं॰ अत्र तत्प्रभातसंध्यायामनुक्तौ नस्फुटत्वमितीति रिसदोषः॰ आहूतेष्विति॰ विहायसा
गच्छंतीति विहंगमाः क्षिराप्तेषाहूतेषु पुरोऽग्रे आयान् आगच्छन् मशकेन वार्यते तस्यापि विहंगमत्वात मध्ये वा दिषि वा दिधेर्मध्ये वा वमन्निति पड्॰ लुकि
रूपं निवसन्निसर्थः ताद्दशात्तत्पामणिमंहतां मणीनां रूचं धत्ते॰ तत्पाकर्षको मणिविशेषस्तत्पामणिरितकेचित॰ स्मइमणिरित्यन्ये॰ त्वद्यो तोपिते जेस्विना
मपि मध्ये प्रचलितुं गंतुं न कंपते न बिभेतीत्यतः अचेतनं विवेकशून्यमतएव नामपृष्ठं अनालोचितं तत्त्वांतरं स्वरूपतारतम्यं येन तत्तसामान्यं सामान्यं विहं
गमत्वादिरूपं धिक्॰ कमिव॰ तादृशं पशुमिवेति॰ अत्र ताद्दशं सामान्यं सामान्यं सामान्यं विहंगमत्वादिरूपमिति स्येतावतैवाविवेकिनः प्रभोरवगतिसंभवात्पु
नरुक्तिः पुंके मपुष्टार्थत्वमप्रस्तुतप्रशंसायां दोषः एवमन्येष्वे वेविधा यथासंभवमलंकारदोषा उक्तरीत्या पूर्वोक्तदोषेष्वेवांतर्भवंतीति पूर्णमि
दमुदाहरणविवरणविद्वासो विदांकुर्वंतु गोमीनयनं निपीतं वासो मृदुलं वसानमतिपीतं नवघनकांतिकलापं नमत अमुकुंदं कलालाघं १ अनन्यक वि
कल्पितात्रिलसद्दर्थमंजषिकां सदन्वयविबोधिकां विबुधसंश्रयोच्छेदिकामुदाहरणपोजनाजनसज्जनाहादिकामुदाहरणचंद्रिकां भजनवैद्यनाथो
दितामृ २ विपदैदमुनिक्ष्मा भिर्मिते व्देकार्तिके सितेकुधाष्टमामिमं ग्रंथं वैद्यनाथोऽपूपुरपतत्३ इति श्रीमत्सदाशिवप्रमाणाभिज्ञधर्मशास्त्रपाएवारी
णतत्सद्विद्दलभट्टात्मजश्रीरामभट्टसूनुना वैद्यनाथेन रचितायां काव्यप्रकाशोदाहरणविवृतावुदाहरणचंद्रिकाख्यायां दशमउल्लासः संपूर्णः ७

काव्यप्रकाश टीका उदाहरणचंद्रिका

४८००